प्रश्नदीपिकाप्रकाशे षष्ठाध्यायः

४२६४



॥१

श्रा·टी· श्रीमते रामानुजाय नमः श्रीगुरुभ्यो नमः इत्यालोचा॥ ननु क्रमनिरूपणस्य प्रातिस्विकरूपे
१ णाधिकारनिरूपणहेतुत्वाभावात्कथं तदानंतर्यमधिकारनिरूपणस्येत्यत आह भेदादीति क्र
मनिरूपणस्य प्रातिस्विकरूपेणाहेतुत्वेपि द्वितीयाद्यध्यायचतुष्टय [redacted]
स्यानुष्ठेयवर्गनिरूपणतयानुष्ठेयनिरूपणाधीनेधिकारनिरूपणेहेतुत्वाद्द्वितीयाद्यध्यायच
तुष्टयानंतर्यमधिकारलक्षणस्य युक्तमिति भावः। नन्वेवमधिकारसद्भावप्रतिपादकस्य प्रथ
माधिकरणस्याध्यायासंगतिः स्यादत आह तद्रूपोद्घातेति। अधिकारं व्याचष्टे स्वाम्यमिति
तद्देवविद्वल्लौकिकमेजन्येति। किं धात्वर्थो भाव्यो उत स्वर्गादिस्तदर्थं च किं धात्वर्थः प्रधानमुत
स्वर्गादिरिति संशयमभिप्रेत्याह तदर्थमिति। स्वर्गशब्दस्य समासे उपसर्जनीभूतस्याख्यातसंबं
धाभावेपर्यवसितमर्थमादायास्य गुणप्रधानभावसंदेह इति बोध्यं। क्रियाकर्त्रे रूपइति। क्रियायां श्रीरामः
कर्तुर्गुणत्वनैयत्येपि मलिनेन स्नातव्यमित्यादाविव तस्य प्रधानकोद्दुन्नेषः। प्रधानतः गुणत १
इति सार्वविभक्तिकः प्रथमार्थेतसिः शाब्दतः पुरुषे तृतीयमानं गुणत्वसाधनत्वं च स्वर्गे पर्यवसा

यययनुफलफलिभावमुपपादयति यदीति एवं च पूर्वपक्षे क्रियाकर्तृसंबंध इत्यंनिष्पन्न इत्याह
न दयमिति। स्वर्गसाधनत्वेन कामयमानो यजेतेत्येतच्च क्रियाक्षेपादेव यत्किंचित्द्रव्यस्य सा
धनत्वेन कामना सिद्धे द्रव्यविशेष स्वर्गविधेयपर्यवस्यतीत्याह स्वर्गेणेति संति संभवे कामयते रनु
वादकत्वमयुक्तमत आह यद्वेति विशेषणमिति यो यजेत स स्वर्गकामः सन्निधेरेव सिद्धस्यार्थ आ
त्मार्थत्ववृत्तेरर्थात् स्वर्गार्थत्वसिद्धिमाह स्वर्गकामस्येति प्रथमेति। श्रीतिवचनत्वे द्रव्यवचनत्वे च त
त्कामनायाश्चांगत्वोपपत्त्या द्वितीयपूर्वपक्षोपयोगाभावादितिभावः भूतं निष्पन्नं। भव्याय साध्या
यैवेष्टरीत्येचाद्दृष्टार्थ नास्यादितिभावः। न साधनत्वासंभव इति। न चोत्सन्निशिष्टपुरोडाशाद्यव
रोधादसंभव इति वाच्यं स्वर्गकामवाक्ये वाजिनन्यायेन चंदनादिद्रव्यविशिष्टकर्मान्तरविधानादि
तिभावः। अथवेति स्वर्गविशेषितकामनाविधौ गौरवादृष्टार्थत्वापत्तेश्च ज्योयानिति बोध्यं। नसि
ध्यतीति। अलौकिकश्रेयः साधनस्यैव धर्मत्वादितिभावः। तदधीनमितिधर्मस्य चोदनालक्षणत्वाधी
नमित्यर्थः॥ विधिश्रुत्याएकप्रत्ययरूपयाभावनायाः प्रथमं विधिनासंबध्यमानापुरुषार्थभाव

शा० ६ केन संबध्यत इत्याशंकायामाह यस्मिन्निति स्वर्गादेः साधनत्वस्य श्रौत्यादिवत्कामनासंयोगं विना अनु
२ पपत्तेस्तन्मात्रार्थं यागस्य स्वर्गादेरेव भाव्यत्वं स्वीकार्यमित्याह स्वर्गादिरिति लिङिति लिङ्त्वादिरूपेण
शाब्दभावनात्मकविधिमाख्यातत्वरूपेण पुरुषप्रवृत्तिरूपार्थभावनां चाभिदधती त्यर्थः। एवमेवे
ति अभिधाश्रुत्येति शेषः। ननु वेदे आचार्यादिवत्प्रवर्तकपुरुषाभावान्निराश्रयप्रवर्तनानसंभ
वतीति शंकते कस्येति शाब्दस्येति। तस्यैव प्रवर्तकत्वात्प्रवर्तकनिष्ठत्वाच्च प्रवर्तनाया इति भावः।
तमेव शाब्दनिष्ठं व्यापारं विशेषतः प्रतिपादयन्नुत्तरार्थभाव्यकत्वसिद्धिमुपपादयति यद्यपीत्या
दिना। एवं धात्वर्थस्य भाव्यत्वात्प्रच्युतस्य भावार्थाधिकरणन्यायेन करणत्वमित्याह यागस्येति।
तद्भावना स्वर्गभाव्यकभावना विधीयत इत्युच्यत इत्याशंक्य सत्यं स एवार्थः पर्यवसानगत्या न त्वो
च्यत इत्याशयेन स्वर्गकामशेषत्वेन प्रवृत्तिविधेः स्वर्गभावनाविधिपर्यवसानमाह यद्यपीत्यादि
नासंभवादित्यन्तं व्यतिरेकविषयप्रवृत्तेरिति शेषः। तद्धेतुमत्त्वासंभवादिति। साध्यप्रवृत्तिः शेषो यस्य त श्रीरामः २
त्वासंभवादित्यर्थः। न निर्दिश्यत इति अर्थान्तरविषयप्रवृत्तेरिति शेषः। नन्वेवमपि स्वर्गकामार्थ
४ ननु स्वर्गकामो यागेन कुर्यादित्यत्रार्थप्रवृत्तिं स्वर्गकामपुरुषं प्रति शेषत्वेन प्रवृत्तिविधानमेव वाक्यार्थस्तत्क
४ थं स्वर्गभाव्यकभावना x ४

प्रहृत्ते योगविशिष्टाया उपदेशाद्यागो भावनाया मेव साधनं न स्वर्ग इति यागस्य फलसाधनत्वाभा
वान्न तत्र पुरुषाधिकारसिद्धिरत आह अतइति स्वर्गसाधनत्वेनैवेति भावनाजन्यस्य यागस्यभा
वना साधनत्वासंभवादिति भावः सत्रे इत्यादि एणां स्वर्गप्रकारीनां ॥ फला ॥ सांपरायिकं इति परलो
कभोग्यपेत्यर्थः ॥ स्तुनश्चतुर्दश्यामुपवसतः प श्यामंश्येनंगाश्चाप्स्यामिमिति प्रसिद्धेराह तेषामपीति
नथ्याचोपवासफलइ त्याग्निहोत्राहि फलेष्विजन्मान्तरसंस्कारवशात्कामनासंभवतीति भावः । च
तुर्थ्यन्तशब्दस्य यज्यर्थोपाधिमात्रत्वात् त्यागस्यैव मानससंकल्परूपस्य यज्यर्थत्वान्तत्रैतिरस्वा
मपि शङ्किरविकल्पेत्याहुः । स्वर्गकामत्वस्य सर्वेषां मविशेषाल्लंकनेन चपरावानेति । अस्मिचे
ति नित्यवृन्दुतानामंगानां नित्येन क्रतुमात्रेणैव संबंधो नानित्यैव क्षुधस्क्रतुनेति भावः । तत्रे
ति जीवनादे र्निमित्ततया तस्मिन्सति नैमित्तिकावश्यंभावोवक्ष्यतइत्यर्थः । तिरश्चामिति चतु
र्दश्युपवासादे रोगजाद्यरुच्याप्युपपत्तेर्नैजन्मान्तरसंस्कारात्फलकामनाकल्पनेति भावः ।
अनाहाविति सिद्धांते स्त्रष्टिप्रलयानंगीकारादिति भावः । विग्रहेति देवताधिकरणन्यायादिति

शा॰ ६ भावः। देवतानां तिर्यगधिकारविचारस्यान्यत्र हत्रिफलकत्वाभावादनुष्ठानविशेषफलकत्वरहितेऽपि
न्यायसाम्यमात्रात्कृतः। लिंगाश्रुत इति एवं चोधाद्विकं प्रतिकृतोरविधानान्न स्यानधिकारश्चेत्स्वि
३ याश्चाप्यनधिकार इत्युत्थितेः संगतिः। अननुष्ठान इति अनुष्ठातुरेव फलस्वाम्यमिति भावः।
ग्रहस्त्वेति ग्रहत्वविशिष्टस्य इत्यर्थः। तथा च ग्रहत्वविनानोद्देश्यप्रतीतिपर्यवसानमतस्तद्विवक्षि
3 ते। न च लिंगं विना तथा। स्वर्गकामपदेनैव तत्पर्यवसानादिति भावः। वाक्यानि उद्देश्यपरिच्छेदेन
पेक्षितस्यापि विवक्षायां तु सः स्वर्गकामवत्स्पष्टमुद्देश्यत्वापत्तेरिति भावः। वाक्यभेदश्च संगाच्चेत्य
न्वयः। तत्र हेतुरनपेक्षत इत्यादि लिंगस्य प्रातिपदिकार्थत्वेऽप्यविवक्षोक्ता इदानीं तदेवासिद्धमित्या
ह न चाप्यमिति पत्नीशब्दस्येति। पत्युर्नो यज्ञसंयोग इति स्वामिवचनात्स्त्रीशब्दाद्यज्ञसंयोगे ङीष्
त्यप्रत्ययप्रातिपदिकांतनकारादेशस्य च विधानेन पत्नीशब्दव्युत्पादनात्तस्य स्वामिवाचित्वमि श्रीरामः
त्यर्थः। सूत्रे स्वर्गकाम इति लिंगविशेषनिर्देशात्पुमधिकार एवेति शायनआचार्यो मन्यते॥ स्व ३
वा। सिद्ध इति निमित्तसप्तमी पत्नीस्वत्वयोरधिकारस्यासिध्यर्थमित्यर्थः। अन्वारंभणीयेति संप

त्नीपद्दोमातिव्याख्यानिर्वापाद्दौपत्न्यन्वारंभः अत्र व्याप्रसुक्रुग्रहाद्दौ यजमानान्वारंभोपि वोध्यः।
स्वामीति पत्नीशब्दस्य स्वामिवाचित्वं पूर्वोक्तं यजमानशब्दस्यापि कर्तृत्वाभिप्रायेक्रियाफलं इति विहिता
त्मनेपदं तनया स्वामिवाचित्वमितिभावः। स्वामिनश्चेतिपरिक्रीतस्या द्वेघाद्विकल्पकर्तनेस्वा
मित्वासंभवादितिभावः। संसृष्टेति संसृष्टं द्रव्यं तेनैकेनत्यक्तुं शक्यमितिभावः। विभागेतिन भर्त्रा
सह विभजेदितिवचनादितिभावः। सूत्रेइत्यवतो देय तोरा ज्याविक्षणादिवचनान्मह प्रयोगःस्या
त्।।धाधा। सस्त्रीकाविति। सर्वन्यायेनस्त्रीसाहित्यस्यावश्यकत्वादितिभावः। नेनेति। दंपत्यो
रेकंकर्तृत्वमितितदभिप्रायत्वे हि वचनानुपपत्तेर्द्विवचनोक्तकर्तृत्वेद्वयबलात्तु द्वयाधिकारः कर्त्रे
धिष्ठानहित्वाभिप्रायत्वेद्विवचनं नमुख्यार्थं स्यादितिभावः। नन्वस्त्वाख्यातसंख्यायाः कर्तृत्व
प्रान्वयस्तथाप्येकस्मिन्नादेक्षातुनाधानमुद्दिश्यतत्राख्यातेन कर्तृद्वयविधिरनुपपन्नइत्याशंक्य
वसानाविरुद्वनेन द्वन्द्वं द्वयविधिप्रगमान्तरहोपइत्याशयेनाह वसानादिति। अर्थात्ऽशंकोत्तरत्वेनव्या
वष्टे। यद्यपीतिनन्वेवं द्वयप्रतिपत्त्याजाहीवपिस्त्रीसहितीयत्वेनस्यात्तत्राह अस तीति। परस्वशंकित्य

श्रा० ६ मादितिएकप्रत्ययोपात्तत्वादितिभावः। ननु सन्निधिशिष्टैकत्वविशेषान्नपुंहृदयविधिस्तत्राह [illegible] वक्ष्य
४ माणरीत्या क्षौमवसानसंबंधविध्युपपत्त्याविधेयांतराभावेनवाक्यानर्थक्यप्रसंगात्तु हृदयमात्रवेध्य
मितितद्धेतुरोधेनउसन्निवाकोएकवचनं नसाधुत्वार्थमितार्थः। ननु कथं क्षौमस्यपुंहृदयस्य च विधिः
प्राप्तेकमेएणेनेकविध्ययोगात्तत्राह क्षौमेति कर्मकालेवस्त्रेशाद्वत्वं मालिन्यं च संभावितमिति
भावः। नन्वाधानेपुंहृदयविधानेधात्वर्थस्याविधेयतयावाक्यार्थविध्यविशेषात्तकेनविशेषणक्षौ
मशब्दोनुवादकइष्यतेनवसानाविति ग्राह्यस्तत्राह एवं चेति। उभयत्रवाक्यार्थविधिसाम्येपिपुंहृद
यसंबंधविधानेआधानस्यविधायकप्रत्ययेनसहैकपदोपात्तत्वात्तत्संबंधः प्रत्ययस्यात्यंतसन्नि
कृष्टो विहितो भवतीतिश्रुत्यनुग्रहः क्षौमवसानसंबंधविधानेतुधात्वर्थस्योद्देश्यतयापिविधिसं
बंधाभावेनकेवलपरपदसंबंधविधानोद्देश्यप्रकृष्टत्वमिति भावः। मुख्यः सन्निधानेनजघनाख्या श्रीराम:
नस्यमुख्यार्थत्यागेनदोषइतिसूचितं। क्षौमं विधीयतइति। वसानोद्देशेनेति शेषः। प्रकरणा ४
दाधानसंबंधिवसाननिवेशः। यद्वा। आधानांगतयावाक्येनप्रातिपदिकार्थः क्षौममात्रंविधीयते
द्व्यंतदिप्रकृष्टार्थविधानात्केवलं [illegible] स्यादित्यर्थः। क्षौमाधानसंबंधविधानेविवसानपदव्यवधाना २

नऊतावद्द्वितीयाहुत्यां चवृसानपदसमुदायइतिभावः। यदुक्तं सूत्यनुग्रहइतितत्राह सन्निकर्षश्चे
ति। विधिस्तुतिसन्निकर्ष इत्यर्थः। शब्दार्थेति सोमशब्दार्थेत्यर्थः। विवक्षितमिति। एतद्धि मस्यक्षो
मविधायकत्वेनार्थवत्तयातद्विवक्षाकारणाभावादित्यर्थः। सूत्रे एतेन राजपुरोहितो यजेयातामि
ति द्वियज्ञवदाधानं द्वयाधिकारकं॥ नस्यात्स्थितइतितत्थाचतद्विशेषविचारात्संगतिः। पूर्वा
धिकरणोक्तारव्यानार्थसंख्यायाः कर्तृरूपान्वयस्य क्षोमपदानर्थकबाधकेनापवादनेस्यात्
दनस्यान्यत्रातत्स्थिरीकरणोक्तारव्यानार्थसंख्यायाः कर्तृरूपान्वयस्य क्षोमपदानर्थक्यबा
धकेनापवादनमुसादनस्यान्यत्रानतत्स्थिरी फलकत्वान्नव्यवधायकत्वमितिभावः। ये
त्विति। अंजनस्नानोदयइत्यर्थः। फलिसंस्कारेषुपिवपनस्यनावृत्तिः केशश्मश्रुवपतइति
उपादेयकेशश्मश्रुगतसाहित्यस्याविवक्षितत्वात्तस्यैवं स्यैवव्यवस्थितत्वादेतएवमाहिव्याह
त्यर्थमुक्तं नव्यवस्थापिताइति सिद्धांतमाहविद्वज्जयेति। प्रतिषेधादितिधर्मशास्त्रइतिशेषः। स्र
ऽत्र तस्याः पत्न्याः पापावदुक्तमान्यावेक्षणादिकमाशीः शाद्वेनापुर्दान्ते ग्रे स्यायुर्मे देही स्याद

श्रा० ६ यः अत्यगाशिषो मंत्रान विवक्षिताः अध्ययनराहित्येन स्त्रियास्तदसंभवात् किंतु फलिसंस्काराक्षे
५ वत यावब्रह्मचर्यस्यापि फलिसंस्कारत्वादेव ग्रहणोसिद्धे ब्रह्मचर्यशब्देन कार्यकारणयोरुपचारात्का
माउच्यते - तेनना न्यादिति।। चातु।। यजमानविद्यानुष्ठानसिद्धेः स्त्रिया विधानाभेपान्मंत्रवत्क
5 र्मकर्तृकत्वासंभवेपि अस्य विद्याज्ञपसंभवाद् इत्यधिकार इति संगतिः। ननु अस्या अध्ययनसा
ध्यविद्यायाः क्रतुविधिभिराक्षेप्तुमशक्यत्वात्कथं पूर्वपक्षस्तत्राह हेधेति क्रत्वनुष्ठानेति अना
रभ्यविहितमप्यध्ययनं सामर्थ्यादर्थज्ञानार्थं सत् ज्ञानरूपार्थत्वेन तस्य पुस्तकपाठादिनापि सं
भवेनाध्ययननियमानर्थक्यात् क्रतुपर्वयार्थज्ञानार्थमपि भवतीति तत्क्रत्वर्थमित्यर्थः। ननु एवं सत्यत्रा
ह्मणामुपनयनेत्यादिना विहितमुपनयनं प्रयोजनापेक्षं सन्निहिताध्ययनांगमिति तत्साध्यमध्य
स्य३ यनं कथं स्त्र्यास्यात्तस्या उपनयनाभावात्तत्राह तत्रेति। अनुपनीते इति। आचार्यकर्तृकोपनयन श्रीरामः
यनाभावेपि स्वकर्तृकोपगमनेनैवाध्ययनसिद्धिरिति भावः। अक्षरग्रहणादिति। आदिनाप
दज्ञानपदार्थस्मरणादिः। अर्थज्ञानं यावदिति। अक्षरग्रहणस्याव्यवहितत्वेपि फलत्वं न्वान ५

वगमादर्थज्ञानस्य तद्वगमात्रत्वं र्यतं गतेततत एवाध्ययनप्रयोजनाकांक्षाशांतेर्नव्यवहितस्वर्गप
र्यंतत्वमितिभावः। ननु ह्यो रेणोति अनारभ्याधीतत्वेन क्रत्वनुप्रवेशे प्रमाणाभावात्केवलज्ञानेन स्वर्
पार्थमेवाध्ययनेन चैवं नियमानर्थक्यं। इव्याजेन नियमवदृष्टार्थत्वोपपत्तेरितिभावः। अवे गुणाणादि
ति। नियमाह एवलोपेपि ज्ञानमात्रात् क्रतुनिर्वृत्तेरितिभावः। अनधीतेति। विहिताध्ययनरहितेत्यर्थः।
नन्वध्ययनसिद्धविधेस्त्रैवर्णिकैरेव क्रत्वाकांक्षाशांतेर्न शूद्रस्य विद्याप्रयुक्तिस्तत्राह। क्रतवइति।
अध्ययनसिद्धविद्यया शूद्रस्याधिकारानिर्वाहात्तद्देशे आकांक्षाशांत्यभावाद्विद्याप्रयुक्तिरि
त्यर्थः। अस्मिन्पक्षेऽध्ययनस्य क्रत्वर्थताभावेन प्रथमावद्विहितमध्ययनेन प्रयुंजीतेति त्वर्थविहित
मेव विहितं तत्र त्रैवर्णिकमात्रविषयमिति विशेषइत्युपसंहरति अतइति द्वितीयपूर्वपक्षोपयोगित्वेनो
क्तमप्यध्ययनानंगत्वं प्रथमपक्षनिराकरणार्थमनुमन्यते समाप्तमिति द्वितीयपूर्वपक्षं निराकरोति
नत्विति तिन त्वर्थज्ञानमात्रमेवांगं नत्वध्ययनकृतं मानाभावात् ततश्च क्रत्वर्थस्यापि विद्याक्षेपा
दधिकारसिद्धिस्तत्राह तद्धतइति उत्तरार्धं व्याचष्टे। क्रतुविषयइति यथा गोदोहनमाश्रयक्रियापेक्षं

सा॰ टी॰ ६
६
6

प्रसंगात्कृतत्वर्थप्रणयनेन निराकांक्षत्वान्नाक्रियेति नरमाक्षिपतितथा कृतत्वेपि विद्यापेक्षाविहिताध्य
यनेन निराकांक्षत्वान्नोपायांतरेणाग्रहस्य विद्यामाक्षिपंतीत्यर्थः। सूत्रे कामस्तु स्वविशेषाच्चातुर्व
र्ण्यमधिकृतं॥ अ॰ या॥ विदुषामेवेति। संगतिः सूचिता। प्रत्यक्षविधीति उपनीताधिकारिकाध्ययनवि
धीत्यर्थः॥ अं॰ गा॥ अतिदेशात्वादभ्यधिकाशंकामाह इव्याहाग्निरिति। अंतरंगमिति आत्मह्नित्वा
दिति भावः। सूत्रे तद्धर्मादिव्यरहितधर्मानुत्यर्थः। ३ सू। आधानेसर्वांगोपसंहारं समर्थस्यैवाधि
कार इति तंत्ररत्नेस्थापितत्वान्नतत्राप्रतिसमाधेयांगवैकल्यपुंसः स्याधिकार इति सूचयति आहि
ताग्निस्त्वादि इति सूत्रे उ सन्नोपेषामंगवैकल्यजात्यधादीनामुपलक्षणं सर्वेषामप्रतिसमाधेयांग
वैकल्यानां तेनाधिक्रियंते आज्यावेक्षणादिभिः कृतेर्नित्यसंयोगात्॥ अं॰ न्या॥ एकार्षेयद्व्यार्षे
ययोरप्रतिसमाधेयांगवद्सामर्थ्याभावादस्याधिकार इति प्रत्यवस्थानात्संगतिः। आर्षेयं यजमा श्रीरामः
नगोत्रप्रवर्तकमहर्षिं। नंपचेति। पंचातिक्रम्य न वृणीते त्र्यादीन्वृणीत इत्यर्थः। ३ नेति। अत्रैवका ६
रेणैकार्षेयद्व्यार्षेययोरेव ग्रहणात्रिः नपंचार्षेयादीनां तेषां स्वकीयऋषिमध्ये ऋषित्रयवरणेनाधि

कारस्यासिद्धांतिसंमतत्वाद्धिति प्रतिषेधइतिपर्युदासं इत्यर्थः अन्यथाविधिप्रतिषेधाभ्यां विकल्पाप
त्तेः। नच्छ्रवणामिति नच्छद्दः पंचत्वातिरिक्तपरः पंचवरणाभ्यवरणात् एकत्वादिभिरार्षेयवरणविशेष
णोपाचतुरादिनिषेधप्राप्तेर्निषेधद्वयंवानुवाद इतिपक्षांतरमाह अथवेति। पंचवेति। प्रथमेपक्षे
नत्रपंचानांप्रतिषेधाभावेनैकादिसमत्वाद्धितीयेतुसामान्यविधेरेकत्वादिसंख्ययेवपंचसंख्यया
विशेषणाभावेन पंचवरणाप्रसक्तेः वाक्यद्वयमितियद्यपिपर्युदासद्वयविशिष्टवरणविधानान्न
वाक्यभेदस्तथापिद्वयोरपिपर्युदासयोर्विशेषणत्वे विशिष्टविधिना विशेषणद्वयविधेः कल्प्य
त्वात्तदभिप्रायं द्वयमित्युक्तं। इत्याद्याविति। आदिना आर्षेयंवृणीत इत्यस्यापिसंग्रहः। अर्थस्य वा
देन अर्थवादेनासद्भूतवन्निर्देशान्यथानुपपत्तेति पाठवत्। संख्यात्रयेति संख्यात्रयविशिष्टवरणेत्यर्थः।
त्रित्वविशिष्टेति अनेनार्षेयंवृणीते त्रीन्वृणीत इति चोभयमेकं वाक्यं तत्र एकएवात्र विधिरितिसूचितं
एवं च तस्मात्त्रित्वमेव विधीयत इत्यादि पूर्वत्र व्यवहारः एकादिव्यावृत्तिमात्रात्तात्पर्यादितिध्येयं॥ व
चा। निमित्तप्रतिनैमित्तिकाद्वयोः कालान्नित्यवत्संनिहितबाध इति भावः। विहितत्वादिति अनेन अव्या

शा०दी०६
७
7

र्थयवद्विदुषोप्य सामर्थ्यादनधिकार इत्युत्थितेः संगतिः सत्रेवचनाद्रथकारस्येदमाक्षानंतर्यास्या
धानस्य सर्वत्रैवर्णिकाधानापेक्षणाच्छिशिष्टत्वात्त्रैवर्णिकरथकारस्येदमिति। स्थप।वास्तुम
यं वास्तु शाकबीजप्रकृतिकं योगादेवेति। एवं च पूर्वविषयत्वात्संगतिः। श्रुतइति। विहिताध्ययना
भावेप्युपायांतरेण ज्ञानेसंपाद्यमिति भावः। निषादो नाम ब्राह्मणाच्छूद्रायुत्पन्नः। तथा च तस्य शूद्र
त्वादतिक्रांतं शूद्रयाजननिषेधानामेवात्र याजकत्वबोध्यं॥ ॥इति श्रीचंपकनाथविरचितो शा
स्त्रदीपिकाव्याख्यायांप्रकाशाख्यायां षष्ठोध्यायस्य प्रथमः पादः॥१॥ ॥पुह॥ पूर्वस्मिन्पादे
स्वर्गकामनिषादस्थपत्यादिभिरधिकारिनरोपलक्षापकशब्दैरधिकारो निरूपितः। इहत्वाख्या
तेन निरूप्यते आख्यातं चानवगतसंख्यामात्रप्रतिपादकेन तद्द्वारेण रप्रतीतिविलंबितेतिपादांतर
त्वमानंतर्यं चेत्याह। समुदायस्येति समुदितानामित्यर्थः। यथाश्रुते आख्यातोपात्तबहुत्वानुपपत्तेः श्रीरामः
उद्देश्यसाहित्यस्याविवक्षितत्वेप्युपादेयकर्तृसाहित्यबलाद्यथोक्तसहितानामेवकर्तृत्वमिति परि ७
हरति। तथापीति कर्मणीति। प्रयोग इत्यर्थः। व्यासज्यकर्तृत्वमिति आख्यातोपात्तबहुत्वं कर्तृत्वा

अयान्वयीतिभावः। प्रथममस्तुपगमवादेनाहमसमुदायस्येतिद्वानीवस्कगत्याप्रसंगतरमाहकर्तृत्व
मपिचेतिकर्तृत्वाश्रयसंख्यावाचित्वमिति भावः। संभवतिचेतित्र आद्ययेणाप्याक्षिप्यतेयद्वत्वंतत्र
सर्वेषांस्वस्वांशत्यागेस्वातंत्र्याक्षितिभावः सत्रेतिस्यपृथगधिकारः स्यात्तत्पुरुषार्थस्यफलेस्यैक
सिद्धित्वात्स्यैकसिद्धित्वात्॥ त्रयो। फलार्थिनमिति। स्वर्गकामोपजेतेत्यादाविति शेषः। अहइति
सप्रसंयताहृति। अहइवेत्यर्थः। विधीयमानेतिविधीयमानायाक्रियाभावनाख्यातयास्वविहृतेस
र्ष्यमाहिप्रायोगुणभूतः कर्तृतकृताः संख्याउपादेयगतत्वाद्विवक्षितेत्यर्थः। भवेद्भावनाविधोन
गुणभूतकर्तृसंख्याविवक्षासएववत्वसिद्धः स्वर्गप्राप्तिपरत्वाद्वाक्यस्येतिश्लोकाशयंविवृण्वन्नप
रिहरतितदसदिति ऋविवक्षितेति एवं वयुत्पाद्यत्वादेयगतत्वेनसाहित्यमविवक्षितमेवमिहापिसं
ख्येतिसंगतिः नन्वाख्यातवाच्याभावनेवविधेयानेनत्वश्रुतप्राप्तिसत्राहयदीतिश्रुतानुपपत्तेर
श्रुतार्थपरत्वमितिभावः। अत्रस्कश्रुत्यनुग्रहायप्रत्ययस्यभावनापरत्वंस्थापितद्विधाभावात्संस
ख्याविवक्षेत्याहयद्यपीतिवैरूप्येतिवैरूप्येतिप्रत्ययस्यैकव्यापारेणाहेशोपादानासंभवेनाहस्यवे

शा॰ दी॰ ष्ट्यभावादिति भावः अग्नेर्वेति तर्हीत्यादि। क्रियाविध्यभावेऽपि यागगतसंख्याविशिष्टो विधीयतामित्य
८ पि न वाच्यं। यागस्य संख्यावैशिष्ट्यासंभवादित्याह नहि शेषणमिति। अत्रापि पक्षे पूर्वोक्तवैरूप्यं
बोध्यं। लिङ्गासमवेतोक्तन्यायेन फलप्राप्तेरविधेयत्वाद्यागेन स्वर्गं प्राप्नुयादित्यर्थवर्णनमयुक्तमि
४ त्याह रागेति प्रत्ययस्य लक्षणादोषापत्तेराह प्रत्ययश्चेति। भावनाविधिपक्षेऽन्योऽपि स्वर्गमाप्नुया
दित्युक्तदोषमुद्धरति उपग्रहेति यजेतेत्यात्मनेपदात्क्रियाफलस्य कर्तृगामित्वादित्यर्थः। यत्र ना
त्मनेपदं तत्रापि कर्तृगामित्वमाह विधेश्चेति। चेतनप्रवर्तनात्मको हि विधिर्नवान्यफलसाधनेऽ
न्यः प्रवर्तयितुं शक्त इति विधित एव सर्वत्र फलस्य कर्तृगामित्वमित्यर्थः। एवं च यजेतेत्यात्म
नेपदं विधिप्राप्तानुवादकमेवेति भावः। संख्याचेति विहितक्रियाश्रितकर्तृपरिच्छेदाय विवक्षिते
त्यर्थः नियोगेन नियमेनार्थिपदेनेति यद्यपि सर्वपाक्षिकाणां प्रत्ययेनैव क्रियानुवाद उक्तस्तथा श्रीरामः
प्यर्थिपदवत्प्रत्ययस्यापि तदनुवादकत्वसमं भवतीति द्योतयितुमिदं बोध्यं। यो हि पाक्षिकी नीतिः प्राप्ति ८
मुक्त्वा निरस्यति न चेति न त्विति त्वत्र प्रहन्तस्यैवमेव स्यादिवहेकाहापुरुषान्तरीयपत्नीरूपकारणाद्य

न सिध्यतीति तज्ज्ञानामीति पूर्वेण संबंधः उक्तन्यायस्यात्रप्रवृत्तेरेव सिध्यतीति निश्चयपर्यवसितविषय
त्वमिति भावः। भाट्टैकदेशिनां मतमनूद्य दूषयति येत्विति अनुष्ठाने भावने॥ चोदिते हीति वाक्यांतरेण
चोदिते कर्मणि गुणानां कर्मार्थत्वात् परस्परार्थत्वाभावेन न तु परस्परं वैशिष्ट्याभावे सत्येकगुण
विशिष्टगुणांतरविध्यसंभवात्तस्य तस्य गुणस्य कर्तव्यत्वमुपदिश्यते इति पौर्णमास्याधिकरणगु
णसूत्रोक्तन्यायेनेत्यर्थः। इष्टापत्त्याऽऽवाह नन्वेवमिति वाक्यभेदः स्यादिति तत्स्वरूपस्य तेऽप्रसिद्धेति फ
लायगुणविध्यसंभवाद्गुणविशिष्टकर्मांतरविधिरिति रेवत्याधिकरणसिद्धांतो भज्येतेत्यर्थः न चेति
यागस्यापि धात्वर्थस्य क्रियात्वेन गुणतुल्यत्वान्न तद्विशेषणत्वं गुणानामिति भावः। भावनारू
ढं भावनासंबद्धं अर्थाभावनाविषयकत्वसमानाधिकरणानामिति यावत्। भावनार्थेन भावना
परत्वेन अर्थानां विशेषणविधिविनाविशिष्टविध्यनुपपत्तेः विधौ विधिकल्पनेन वा वाक्यभेदः सु
नवाक्यस्याहत्रिलक्षणभेदाभावः अनेकगुणविशिष्टाया विधेयत्वादिति भावः प्राशस्त्यमितिकर्त
व्यपदं प्राशस्त्यलक्षकमिति भावः। अभिधानादिति भाष्यवार्तिकयोरिति शेषः। सूत्रे प्रयोगे प्ररु

शा॰ ६ षमात्रश्रवणान्नस्य गुणाभावाः श्रवणात्केसरव्याविवृत्तायाः अभावाद्यथा कामीत्व योगः स्यात्तथा प्र

२ क्र॥ पूर्वत्र क्रियाफलोपायत्वेन कामिनो विधीयते इत्युक्तं न हि सिद्धे फले तदिच्छा विच्छेदे वा फ

लोपायानपेक्षणान्न क्रियानुष्ठानमित्युत्थानात्संगतिः। किं प्रवर्तने किमिति प्रवर्तत इ

त्यर्थः सिद्धांतैकदेशिमतं शंकते यदीति नस्येति क्रमेणा इत्यर्थः कामस्य काम्यफलस्येत्य

र्थः। समाप्तेशिति त्वारंभमात्रस्य न त्याक्त क्वापि समानस्यादित्यर्थः ननु कामनाया निमित्तत्वे

सर्वाधिकरण एव फलकामो निमित्तमिति चेदित्यनेन सूत्रेणाशंकातन्नित्यत्वादित्यनेन परि

हृतमित्याशंक्य सर्वत्र दर्शपूर्णमासादेर्नित्यस्यानित्यकामना निमित्तकत्वं न संभवति नित्यानि

त्यसंयोगविरोधादिति परिहृतं इह तु त्रयमेकाहशकपालं निर्वपेत्प्रजाकाम इत्यादीनां नित्य

त्वाभावान्नोक्तदोष इत्याह नचेति॰ उक्तमिति स्वर्गकामाधिकरणे इति शेषः। अनृतवादेति श्रीएम॰

संकल्प्यनेष्टवानथमनृतं वादीति आंति निमित्तमित्यर्थः। शांतिमुपपादयति न चेति निवृत्ता २

यामिति कामिनं प्रत्येव फलोपायतया कर्मविधिस्तेन कामनायां सत्यामेव तदनुष्ठानं शास्त्रा

र्थीनासत्त्वामित्यर्थः। आह स्मृत्यन्तरे तुष्यतीति। नियावत अत्रवीतानां फले छायां न तत्फलासंभवन्निरत्यवश्या
पकृयः फलमिसाकरे स्पष्टं। सूत्रे प्रक्रमात्समाप्तिर्नियम्यते आरंभस्य क्रियानिमित्तत्वात् क्रियाया
श्च समाप्तिपर्यन्तत्वात्॥ लोके॥ शास्त्रीयत्वात्सहशास्त्रार्थत्वात्समापनीयमिति एवं च पूर्ववत्त्य स
वस्थानासंगतिः देवताश्रयति अस्यादिशीर्यं देवतेति गृहोदम्भे देन देवतास्या नाविशेषनिर्देशा
दिति भावः। अशास्त्रादिति भोजनाश्रितवाङ्मुखत्वादिनियमवद्गृहकर्माश्रितसन्निवेशनिय
मस्यादृष्टार्थत्वेऽपि भोजनवद्गृहकर्मणा दृष्टार्थमिति भावः। न गृहकर्मेति अदृष्टार्थं वास्तुपूजाया
मेहष्टार्थगृहकर्माङ्गत्वायोगात् दोषश्च सपुरुषार्थत्वेऽपि न वास्तुपूजामुखेनापि गृहकर्मदेवताश्र
यमिति भावः। सूत्रे लोके कर्माणि गृहादीनि वैदिकवत्समाप्यानि पुरुषमधिकुर्वतीत्यधिपुरुषा
णि लौकिककर्माणि तेषां ज्ञानं ततनएव शास्त्रादेवेति हेतोः। भाति। यथा फले च्यावतामेव गृहादिक
र्तव्यमेवं न कलंजभक्षयोर्हिंसादिकमपीत्युभयानात्संगतिः अजापतिव्रतवदिति नेक्षेतोद्यन्तमा
दित्यमित्यादिनिदित्यर्थः। अननुष्ठेयत्वादिति भक्षणाभावस्य हि प्रागभावत्वेनानादित्वादिति

शा० ६
१०
10

भावः । नेदं तु शितितमत्र शिपालकइत्यर्थः अश्रुतफलइति नेष्टो नो घंतमित्यस्य तु एतावता । हेनस्याप्र
क्तो भवतीति शेषः । वाकाशेषफलश्रवणाच्छ्रुतफलस्ये नोतिव हीनस्य सर्वेहासर्वेरपेक्षितत्वात् सर्वहा
सत्वेपि तस्यानित्यत्वं नास्येति विधेयत्वमपि तिभावः । श्रुतेति निनञ्श्रुतं भक्षयातिश्रुतेत्यर्थः । नि
वर्तनादेवेति । इयं वेदेन नञ्समभिव्याहृतविधिप्रत्ययधर्मो लोकेतु प्रथमः यत्तु विधिप्रत्ययसमभि
व्याहृतनञर्थो निवमणा नतु नञ्समभिव्याहृतविधिप्रत्ययार्थ इत्याहुः । तन्मते नञ्धर्म एवेति
बोध्यं । प्राभाकरास्तु सर्वत्र कार्यमेव वाक्यार्थ इति वदंतो निषेध्यस्य प्रत्यवायः फलं नकल्प्यं न
नञर्थेन विषयेण निषेध्यप्रवृत्ते न विनियोज्येन चान्वितस्य नियोगस्य वाक्यार्थस्य परिग्रहणेते
नकल्प्यकाभावात् न च नञर्थस्योदासीन्यस्य प्रागभावरूपतया कृत्यसाध्यस्य कृत्यवच्छे
दकत्वलक्षणकार्यविषयत्वमसंभवि कृतिसाध्यस्यैव कृत्यवच्छेदकत्वादिति वाच्यं । तस्यापि श्री एमः
परिपाल्यत्वेन कथंचित्कृतिसाध्यत्वादित्याहुः । तन्मतमनन्यगतिरस्यानियोगितेति । श्रु—नेति प्र १०
क्षावतां हि इष्टानिष्टप्राप्तिपरिहारोपायेप्रवृत्तिरिति विधिविषयस्य नञर्थस्य प्रत्यवायपरि

हारार्थत्वाभावेतत्र प्रवृत्तेरेवासंभवात्तद्विषयकार्यं न सिध्येदिति सुतरान्तदर्थविषयकार्यसिध्यर्थ
मेवतेरपि निषेध्यस्यप्रत्यवायफलकत्वं वाच्यमित्यर्थः। ननु कार्यबोधादेव प्रवृत्तिसिद्धेर्नेतदर्थं
तत्कल्पनमित्याशंक्याभ्युपेत्य तथापि प्रत्यवायपरिहारकाम एवात्र नियोज्यो वाच्य इति नियो
ज्यसिध्यर्थं प्रत्यवायकल्पनमावश्यकमित्यभिप्रेत्य भक्षणप्रवृत्तस्य नियोज्यत्वं दूषयति ॥ किं
चेति। आख्याते नेति। तथा च भक्षणप्रवृत्तपुरुषस्यानुपलभ्यत्वात्तदन्वयाद्दूरं सुतरां तदर्थान्व
य इति भावः। एतावता नेति भक्षप्रवृत्तस्य नियोक्तुमशक्यतामात्रेणोत्सर्गः। तत इति। अजीवतो शक्त
स्य च नियोक्तुमशक्यत्वादिति भावः। प्रवृत्तिलाघवादिति फलस्य प्रवृत्तावुत्कटत्वादिति भावः। स
त्रे प्रतिषेधनसिद्धान्तमभिप्रेत्य पुनः कलञ्जभक्षयेदित्यादिषु अकर्मत्वाज्ञानात्कर्मव्यतिरिक्त
संकल्पविधित्वमस्येति विद्वांसो भक्षणाहीनां निष्क्रामेत्ः क्रियापि स्यादकर्मणा संकल्पानां विभ
क्तत्वात्कर्मनिषेधानुपपत्त्यादत्र कर्मनिषेधाभावात्। तस्मिन्॥ आदिपदात्तकलञ्जं भक्षयेदित्या
दिः। एवं च सर्वत्राधिकारिविशेषविकारात्मागतिः॥ अ भ्या॥ स्मृतिबलादुपनीताधिकारित्व

शा॰ ६ वद्धावज्ञो वक्ष्यते: सततानुष्ठानमित्युत्थानात्संगतिः। सततेति श्राव ध्रुपका – रादि कालं वर्जयि
११ त्वेति शेषः। कालविधिस्तु काम्यप्रयोगे चरितार्थ इति भावः। उपादेयमनुष्ठेयं तत्र श्वेति कालेसत्ये
वक्रमेण: कर्तव्यत्वात्तत्कालजीवनमेवाधर्यो निमित्तमित्यर्थः। इदमधिकरणं प्रयोगाद्ध्यनुपा
देयागमात्रविषयमित्याशयेनाह एतेनेति तयोः स्वरूपेणोपादेयत्वकालवैषम्यमित्याशंक्याह
तयोरिति सत्रे वाशङ्को निषेधेनायमभ्यासोऽक्रमशेषत्वात्किंतु नियमः पुरुषार्थ इत्युक्तं। ततश्च सा
तत्येनानुष्ठानं तेषा। सत्रे तेषां कालानामौत्सर्गिकत्वात्कर्मोत्सर्जनिमित्तत्वात्कालस्य पुनः
पुनरागमेनक्रमेणाप्रवर्तेरन्॥ तथा॥ अतिदेशस्य विशेषाशंकानिरासार्थत्वात्तामाह युक्तमि
ति अन्यदितिप्रतिप्रयोगं प्रत्यवायपरिहारादित्यर्थः। शास्त्रेणेति। निमित्तवबोधिशास्त्रेणेत्यनि
मित्ता हन्ता वाहूति पर्यंत व्यापारादन्यथा निमित्त व्याघातादितिभावः। आचा॥ अस्याप्यतिदेशत्वा श्रीरामः
त्सर्वेवा विशेषाशंकामाह तत्रेति नियमे तिगुरुगमनादि निमित्तेष्वसत्सु अनुगमनाहिना आह ११
ते नैव गुरुप्रीतिः सपाहनीयेति नियमस्तदृष्टं चावश्यमभ्युपेयमित्यर्थः। शास्त्रेति आचारात्तुमि

तद्विधीत्यर्थः। एवं च नैमित्तिकत्वात्प्रत्यवायपरिहार एव गुर्वनुगमनादीनां फलं गृहप्रीतिस्त्वा
नुषंगिकं फलं। ब्राह्म्यं॥ गुर्वनुगमादेर्नित्यत्वेऽपि तत्सोमादेर्नित्यत्वमिति संगतिः। यावदिति। याव
ज्जीवमग्निहोत्रमितिवदत्रावश्यकत्वबोधकशब्दाभावादित्यर्थः। तुल्यनिर्देशमाशंक्याह वसंत
इति फलभूयस्त्वार्थाभ्यासाभिप्रायेणावीप्सेति भावः। अध्ययनेऽपि स्वजिज्ञासाय प्रथमसत्रे निरा
साहिधांतरेण फलबलमाह समग्रमइति नित्यत्वानित्यत्वविचारमध्याये संगमयति वसंत इति वीप्से
ति समग्रम्यावसंतस्यानिमित्तत्वे निमित्तत्वबलप्राप्तनैमित्तिकत्वास्यानुवादो वीप्सोपपद्यते न
तु कालविधिपक्षे चप्राप्तार्थत्वात्। फलभूयस्त्वार्थाभ्यासोऽप्यसंभवी। तस्यानियतत्वादतो वी
प्सायोगात्कालस्यानिमित्तत्वमित्यर्थः। ननु काम्यस्येव यावज्जीवं तमभ्यासविधानेऽपि वीप्सोपपन्ने
त्यत आह यावदिति। अन्तरेणेति एव वाच्यन्त्रणेयः पुत्रीयन्वा ब्रह्मवारिवासीत्यनुगानफल
श्रवणादित्यर्थः। अत्र भाष्ये किं सोमादिकं ब्राह्मणस्यैव नियतमुत त्रयाणामिति वर्णानामिति व
र्णाकांतरसुक्तं तच्चं कोत्तरव्याजेन संगृह्णाति न चेति तत्रत्यार्थवादाद्विशेषयहणाय तत्रविध्यर्थ

शा०६
१२

वादयोरेकार्थत्वमिह तु जायमानो वै ब्राह्मण इत्यस्यावदानविधिशेषत्वेन सोमविद्याप्रजविधिशेष
त्वाभावान्नार्थवादगतेन विशेष्यग्रहणं किंत्वर्थवाद एवोपलक्षणतया नेय इत्याशयेनाह विधिना के
षिति द्वितीयवर्णके ऋणवाक्येनैसंयोगात्त्वलु सोमविद्याप्रजब्राह्मणस्यैवेति मन्यसे नैतद्युक्तं
विधिनाक्षेषे विशेषश्रवणाद्विति सूत्रार्थः॥ ॥इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्या
नेप्रकाशाख्याने षष्ठाध्यायस्य द्वितीयः पादः॥२॥ ॥सत्रे॥ नित्येष्वप्याज्ञांगोपसंहारसमर्थ
स्याधिकारोऽस्मिन्पादे व्युत्पाद्यते सर्वथावद्द्वयोः काम्यनित्ययोर्नैमित्तिकार निरूपणोऽक्षीणनि काधि
रूपणादिति पादांतरत्वमानंतर्यं च। समुच्चितानामिति। एकादशे समुच्चितानामंगानां करणोपका
रकत्वस्य वक्ष्यमाणत्वादिति भावः। ननु नित्येषु फलाभावान्न फलप्रयुक्तमंगोपसंहार इत्या
शंक्याह नचेति। निश्रफलेष्ववंतेनानुपपत्तेः पापक्षयः फलं कल्प्यते नचैवं जीवनरूपे निमित्ते फ श्री रामः
ले चेत्युद्देश्यभेदाद्वाक्यभेदः। फलस्य श्रुतार्थापत्तिकल्प्यत्वादिति भावः। धाविति धातुसंबंधेऽत्र प्र १२
याइत्यधिकारे यावज्जीवं जीवेरित्यनेन यावत्सूपपदे जीवप्राणधारणा इत्यस्माद्धातोर्विहितेन

णामुल्लङ्घ्यत्वमेवेन जीवनस्य यजेतेति समभिव्याहृतयजिधात्वर्थसंबंधो निमित्तनैमित्तिकभावरू
पोवगम्यत इत्यर्थः ।निमित्तस्य जीवनधात्वर्थस्वरूपेण संबंधः किंतु निमित्ते सतीदं कर्तव्यमिति कर्तव्य
तयेत्याशयेनाह यागानुरक्तांभावनामिति। नन्वेवमपि सांगमेवानुष्ठेयं दर्शपूर्णमासशब्दस्य काल
युक्तकर्मपरत्वात्सो दर्शपूर्णमासाभ्यां यजेतेति प्रयोगवचनेन सांगस्य कालविधानात्तत्राह ह
श्रुति।उत्पत्तिविधौ कालयोगि नो दर्शपूर्णमासौ शाह्नोवाच कोनतु प्रयोगविधाविति भावः।ननु ही ८५
नांगात्कथं फलसिद्धिस्तत्राह नावैतेवेति। अवश्यकर्तव्यप्रधानानुरोधेनांगन्यूनताद्यथाशक्त्यं
गोपसंहारादेव फलसिद्धिर्निमित्तशास्त्रादेवगम्यत इत्यर्थः।नीचाप्यनंतरंमाभाक्तरमते।काम्ये
भाष्ये विहितस्तु इहाहरणमुपलक्षणमित्यभिप्रेत्याह प्रकृतानां विति सत्वे काम्येष्वपि यथाशक्ति प्र
योगः स्यादशक्तस्यापि प्रार्थित्वाविशेषात्।।क्रिया।।ननु क्रियाभेदाभेदविचारः पूर्वेण न संगतः
नचवक्ष्यमाणोपोद्घाततया संगतिः वक्ष्यमाणस्यापि पूर्वेणासंगतेरित्यत आह अनंतरमिति प्र
कृते नैमित्तिके यथाशक्ति प्रयोगस्यापनए वदृष्टे वक्ष्यमाणस्य पूर्वेण संगतिरेवापेक्षितानप्र

श्रा॰ ६ १२ वैसंगतिरितिभावः। उपोद्घातमेवोपपादयति यदीति द्रव्यस्येति क्रियानाम द्रव्यस्येव स्वरूपमित्यर्थः।
देवतोद्देश्यकद्रव्यत्यागरूपयागक्रियायाः द्रव्यघटितस्वरूपत्वादितिभावः। तद्भेद इति तद्भेनास्य
इत्यर्थः। अन्यथा प्रतिप्रयोगं द्रव्यव्यक्तिभेदात्क्रियाभेदापत्तेरिति ध्येयं। अनेकान्तास्यपगमा
त्भेदान्यत्वश्च नियमानंगीकारात्तत्सूत्रे क्रियाणां द्रव्याश्रितत्वात् द्रव्यव्यतिरेका द्रव्यांतरे वि
13 भागो भेदः स्यात्॥ श्रुति॥ ननु सर्वशास्त्राधिकरणन्यायेनाशक्तस्यागेनापि कर्मकर्तव्यं तत्रा
ह सर्वेति। द्रव्याभावे कर्मणो शक्यानुष्ठानत्वादशक्तस्यानित्यमपि कर्मनारब्धव्यमारब्धं वा नित्यं
काम्यं च न समापनीयमिति भावः। न देति नित्यस्यावश्यकर्तव्यत्वात्प्रक्रान्तस्यावश्यसमाप
नीयत्वाच्च नियमादृष्टमविगणय्य प्रधानमेव श्रयं कर्तव्यमित्यर्थः। सूत्रे श्रुतिप्रमाणकत्वा
द्रव्यत्वादेः शिष्टस्य शास्त्रविहितस्य द्रव्यादेरभावे न्यस्य नागमः स्याच्छिष्टत्वात्॥ नदे॥ दे श्रीरामः
वतानाम् व हिति। उद्देश्यमात्रे देवतानां व्यवहाराभावाद्यत्र या उद्देश्यतया विधीयते सा तत्र देवतेति वि
ध्युपलक्षितमेव देवतास्वरूपमित्यर्थः। नेचेति। देवतोद्देशेन त्यागस्येव यागत्वादित्यर्थः। तत्क्र १३

नेति नीवारेषु कतिपयव्रीह्यवयवसत्वेऽपि व्रीहिजातेस्तद्व्यक्तेस्तद्व्यक्त्यारंभकद्रव्यत्वाद्वयवानां वा
भावाद्व्रीहिनियमादृष्टं नास्ति प्रतिनिधाविति भावः। सत्रे देवतादिकं च प्रतिनिधेयं अन्यार्थसंयो
गात्प्रतिनिधिन्यायान्न्यायान्तरसंयोगात्॥ प्रति॥ रेहन्त्वकार्यकरत्वस्य प्रत्यक्षसिद्धत्वादस्तत्प्र
तिनिधानमिति संगतिः। प्रतिषिद्धपदार्थभावानामिति निसिद्धान्तरीत्योक्तं। व्रीह्यादेरत्राहि पदद्व्यालय
मुद्गाद्यंशाभिप्रायामाषगतत्वोक्तिः। अंगत्वे साधनत्वस्यापुष्कलशरणांश्चन्तरशेतिमाषादेर्न्यायज्ञ
साधनत्वप्रतिषेधेऽपि तद्गतमुद्गाद्यंशानां तत्साधनत्वोपपत्तेस्तल्लाभाय माषादिप्रतिनिधानेना
नुपपत्तिरितिभावः। अर्हेनेतिः यत्तिर्यज्ञशब्दस्याहीर्यघप्रत्ययान्तत्वादितिभावः। अवर्जनीयमिति
माषादीन्वर्जयित्वा तद्गतमुद्गाद्यंशोर्यज्ञस्य साधयितुमशक्यत्वात्तद्वर्जनस्य च तद्गतमुद्गाद्यंशव
र्जनेनैव सुकरत्वात्तन्माषनिषेधस्य मुद्गाद्यंशप्रतिषेध एव पर्यवसानात्तेन प्रतिनिधेयाइत्यर्थः।
सत्रे प्रतिषिद्धं माषादिकमपि न प्रतिनिधेयं यस्माद्विशेषेण यज्ञसंबंधमात्रनिषेधश्रुतिः। नत्या।
श्राविदेशिकीसंगतिः। अनग्निश्चेतिच्चनेन पत्न्या मृतायां यजमानस्याप्यनग्नित्वात्तेन पत्नी

कर्त्तव्यसमापनमवशिष्टेरप्युपपद्यत इति भावः यथोपक्रान्तं तथैव समापनीयं अपथार्थं न समापने वैगुण्यात् सप्तदश ४८

शा०दी० प्रतिनिधेयेति सूत्रवृत्तिं तेनैतावदिति। यजमानकर्तृकाः क्रत्वर्थाः पदार्था इत्यर्थः प्रोषिते। ऋत्विग्वरणेय
१५ त्वा कार्यमिति भावः। फलसंस्कारा इति। अत्रैव यदि यजमानं स्यात्। ततः स्वत एव हि स्वस्थितेनापि यज
15 माने नैव कार्या इति भावः। सूत्रे फलस्य कर्मयोगित्वात् कर्मप्रयोगगामित्वात् प्रतिनिहितस्यैव फल
समवायाय तत्त्वेः स्वामिनस्तथानप्रतिनिधिः। वृत्तः। एवमितिस्त्वेवम्पक्षे कर्तृकं च प्रक्रान्तेन षोडशक
र्तृकमनेनावश्यसमापनार्थमन्यः प्रतिनिधेय इत्याह अत्र स्त्रीति। यथा शक्तौ स्वस्यैवाभिप्रायं विश
द यति व यथा स्यादिना। एकेति तथा च प्रारब्धस्य देशेनाप्यकस्मरेणस्वामित्वविशिष्टकर्तृ
त्वविधानात्कोभेद इति भावः। तन्मात्रे स्वामित्वमात्रेण च प्रयोगात्यागेव साधारणीकृत इत्ये
प्रतिनिहितपुरुषं प्रति स्वत्वाभावेन तस्य यागकर्तृत्वमसम्भवेतीति वाच्यं। क्रयादिना तद्द्रव्याश
स्य स्वीकारेण तस्य कर्तृत्वसम्भवात्। सूत्रे बहूनां सम्बन्धिनि कर्मणि प्रवृत्ते कस्मिंश्चिद्विघ्नय श्रीरामः
माने ऽपचारि ते ऽन्यमागमयेयमथा सत्यैव गुण्यात्॥ नेस्वा। स्वामिस्थाने इति तथा च यदि प्रति १५
निधिः स्यात् स फलभागपि स्यात्तस्मान्नास्ति प्रतिनिधिरिति पूर्वपक्षे पूर्वपक्षं पर्यवसानात्संगतिः

ननुस्वामिकर्तृकसामर्थ्याभावाद्यथाशक्तिप्रयोगइतिसर्वाधिकरणएवोक्तं।नचकाम्येय
थाशक्तिप्रयोगात्फलमस्तीतितस्मादितरेषामपिफलाभावेनस्वामित्वाभावाद्धिशिष्यप्रति
निहितस्यस्वामित्वाभावव्युत्पादनमसंगतमितिचेन्मैवं।वीनायांफलेच्छायामवाप्तेवाफलेव
श्यसमाप्ते:पापक्षयफलकत्वस्यपूर्वपादेऽभिहितत्वात्तन्न्यायेनात्रापितत्फलकत्वसंभवात्प्रतिनि
हितेनस्वाम्यसंभवात्तदभिप्रायेणोक्तत्वात्।स्वामिभिरितिस्वामिशब्दप्रयोगः।सूत्रेतत्संयोगात्ते
नस्वामिस्थानेनसंयोगात्।नतु।सर्वत्रेतिसंस्कारेषुप्रधानभूतस्यापिस्वामिनआर्थिकेक
र्तृत्वसत्त्वात्तत्रापिसामर्थ्यनिर्देशात्इतिभावः।सूत्रेतत्संयोगात्स्वामिकार्यसंयोगात्॥सामा॥
पूर्वोक्तप्रतिनिधौविशेषविचारात्संगतिः।सूत्रेऽत्रसामान्यंसादृश्यमस्तिनीवारादीनांदेवद्रव्य
प्रतिनिधेयंयस्माद्व्रीह्यादिमुख्यशास्त्रार्थचिकीर्षा।निर्दे।इहनसादृश्योपादानमित्युत्थानात्सं
गतिः।सूत्रेयत्सादृश्यंतद्द्रव्यंतन्नसादृश्यमुपादेयं।तत्प्रयोगेप्रहतद्द्रव्यस्यांगत्वेनाविर्देशात्॥वच॥
प्रक्रान्तेपिप्रयोगेवचनाद्द्रव्यान्तरमंगमित्युत्थानात्संगतिः।ननुपक्षद्वयेपिपूतीकेर्यागात्

शा०६ ष्वानाविशेषादनर्थकमिदमिति शंकां व्यावर्तयितुं सोमजातिवदित्यादिना सोमजातिपरिच्छिन्ना
१५ नित्यादिना च पूर्वोत्तरपक्षकोटिनिष्कर्षः कृतः। एवं च पूर्वपक्षे पूतीकानां साधनत्वात्पूतीकापचा
रे पूतीकसदृशोपादानं। सिद्धांते तु पूतीकानां साधनत्वाभावात्तदपचारे सोमसदृशोपादान
15 मिति प्रयोजनभेद इति भावः। मुख्याभावादिति। मुख्याभावे यागस्य द्रव्यापेक्षायां येन केनचि
द्द्रव्येण यागः कर्तव्य इति प्रथममेव सुसदृशं विसदृशं साधारण्येन द्रव्यमात्रस्यास्य नियम
मप्राप्तिरित्यर्थः। सूत्रे मंदसदृशत्वादन्याय्यमपि पूतीकद्रव्यं वचनात्प्रतिनिधिः स्यात्वचन
स्याभावे हि इतरस्य मुख्यस्याभावात्तत्सामान्येन प्रतिनिधिः॥ नग्र॥ वैकल्पिके इति। यथा व्रीहि
भिः प्रयोगे प्रक्रांते व्रीहीणामेव यागत्वं न यवानां। एवं प्रतिनिधीनां प्रक्रांतेन तस्यैव यागत्वात्तत्स
दृशमेवोपादेयमित्यर्थः। यद्यपि नीवाराणां गतत्वापि तस्मिन्प्रयोगे नीवारगता एव व्रीहित्ववयवा श्रीरामः
श्रङ्कुन व्रीहिगताः नीवारगतत्वं च नीवारावयवत्वसहचरितत्वं। नीवारसदृशोपादाने च तथावि १५
धावयवलाभ इति नीवारसदृशमेवोपादेयमिति भावः। एवं च पूतीकानां प्रतिनिधित्वेपि तदपचारे

प्रतीकसदृशोपादानमेव न तु सोमसदृशोपादानमिति पूर्वाधिकरणप्रयोजनाक्षेपात्सं
गतिः। अवेदेवं यदि नीवारगतत्वेन व्रीहित्ववयवानामंगता स्वरूपेणैव तु नेषामंगत्वमतो न तनीवा
रसदृशोपादानमित्याशयेनाह। अन इति। सत्रे प्रतिनिधावपचरितेन तत्सदृशः प्रतिनिधिः
प्रतिनिध्युपचारेपि श्रुतावयवलिप्सया द्रव्यांतरोपादानस्य तुल्यत्वात्॥ स्यान्तु॥ सत्रेष्व ति
लक्षणोक्तप्रतिनिधावपचरितेन तत्सदृशः प्रतिनिधिः स्यात्॥ मुख्या। पूर्वत्र वैकल्पिकन्यायानवतारे
पि इह नदवतारात्मुख्यानादर इति संगतिः। न प्रतिनिधिस्वरूपमिति तत्स्यानंगत्वादिति भावः। स
त्रे मुख्यलाभे तद्देवयतो मुख्याभावादमुख्यागमः। यदा। इह तु न मुख्यं स्यादित्युत्थानात्संगतिः।
नोपादानपरं नोपादानमात्रपरमित्यर्थः। प्रधानेति प्रधानानुष्ठानोद्देशेनांगानुष्ठापकमित्य
र्थः। सत्रे इति चेदिति पूर्वसिद्धांतपरामर्शः। मुख्याधिगमे मुख्यमिति चेन्न्याय्यं ततः प्रवृत्तेपि प्र
तिनिधौ मुख्यमेवोपादेयमिति चेदित्यसंदिग्धवचनं॥ नान॥ पूर्वपत्युदाहरणमात्रमिदानीं
त्यंतं पूर्वपक्षे यजितव्यमिति सूचयति मन्वानस्येति सत्रे प्रतिनिधिनाक्रांते प्रयोजने मुख्य

शा०दी न स्यादानर्थक्यात्। सूत्रद्वयस्वारस्यादाचार्योक्तव्याख्याप्रकारमाह अथवेति ॥ द्रव्य ॥ अनु
१६ ग्रह इति तत्त्वश्च पूर्वत्र गुणानुरोधेपीह तदनुरोध इति संगतिः सूत्रे तदर्थत्वात्संस्काराणां द्रव्या
र्थत्वात्। अर्थी प्रत्युदाहरणमात्रमिदं। सूत्रे प्रयोजनं द्रव्यविरोधे प्रयोजनं बलवदतो द्रव्या
णां प्रयोजनशेषत्वाद्द्रव्याभावे प्रतिनिध्युपात्तिः ॥ विधि ॥ शर्वे बर्हिहापि प्रतिनिधिरित्युक्त्यानोत्तसं
गतिः शेषकार्येभ्य इति स्विष्टकृदिडाप्राशित्रचतुर्धाकरणशंयुवाककालभक्षणरूपेभ्य इत्य
र्थः ॥ किंचिदिति प्रतिनिधौ कतिपयव्रीह्यवयवानां लाभान्नात्यंतबाधः किंतु साकल्येन तद
लाभात् किंचिद्बाधमात्रमित्यर्थः तदंगत्वात् पुरोडाशांगत्वात्ततश्च व्रीहीणां शेषकार्याणां च
पुरोडाशांगत्वसाम्येऽप्यनुग्रहो न्याय्य इत्यर्थः। व्रीहीणां प्रकृतित्वेपि पुरोडाशद्वारा यागसा
धनत्वमेव व्रीहिभिर्यजेतेति शास्त्रात्तथावस्कृतोपि व्रीह्यवयवानामेव पुरोडाशात्मना याग श्री एम:
साधनत्वात्प्रधानांगत्वमित्याशयेनाह व्रीहय इति। सूत्रे एकदेशोपि पुरोडाशमात्रसमर्थो व्री १६
हिद्रव्येपि प्रतिनिधिः स्यात् शेषकार्यादिविधेः ॥ ॥ इति श्रीचंपकनाथकृतौ शास्त्रदीपिका

व्याख्याने प्रकाशाख्यव्याख्याने षष्ठाध्यायस्य तृतीयः पादः ॥ ३ ॥ शेषात् ॥ पूर्वोत्तरपादयोरर्थ
भेदेन भेदमाह पूर्वस्मिन्निति । प्रतिनिध्यनुष्ठानेऽपि यागाङ्गानुष्ठानप्रयोजनमानादिति भावः ।
पादद्वयेनेति । तत्राप्यस्मिन्पादे द्रव्यापचारनिमित्तप्रायश्चित्ताधिकारः प्राधान्येन विचार्यते ।
स च पूर्वपादोक्तद्रव्यापचारानुषंगागत इति पादान्तरत्वमानन्तर्यं चेत्यर्थः । पुनर्मेध्येति ॥ शि
ष्टस्य मध्यप्रबोधसंभवादित्यर्थः । तावन्मात्रस्येति । मात्रबाहुल्ये पुरोडाशमध्यायपादानका
वदानव्याहतेः । कृत्स्नमिति । प्रथमतो मध्यादवद्यतीति शास्त्रप्रवृत्तेर्वेलायां कृत्स्नपुरो
डाशस्यैव दुष्टत्वादित्यर्थः । नन्वाचार्यपक्षे न द्व्यवदानं हविः किंतु पुरोडाश एव तत्र द्व्य ३५
वदाननाशेऽपि पुरोडाशसद्भावात्तन्मते एतत्किं नांशो विरुध्येत तत्राह यदापीति । अविशेष
णादिति । ननु द्व्यवहविर्नाशमात्रस्य निमित्तत्वे प्रत्युद्देश्यं वाक्यपरिसमाप्तिन्यायप्राप्तानुवा
दः सर्वेषामिति भावः । सत्ये व्यवदाननाशे शेषादवदेयं स्यात्तस्य यागार्थत्वात् ॥ अपि । शे
षसद्भावादिति । शेषसद्भावमात्रेणाशेषात्स्विष्टकृतेऽवद्यतीति शास्त्रप्रवृत्तेरवर्जनीयत्वादि

शा० ६ तिभावः। अत एव प्रवर्ग्यादिहनास्यावदेयाभावो येन पुरवदानं न स्यादिति संगतिः। सविति प्रतिपत्त्यंतरा
१७ वरोधादेव तत्त्वेशेषात्स्विष्टकृत इति शास्त्रं न प्रवर्तत इत्याशयः। किं पुरोडाशस्य साकल्यादृशायां
यउत्तरार्धलक्षणोऽवयवः स्विष्टकृत्संस्कार्यः स न दृष्ट एव विद्यमानं न तु तत्तराधेन संस्कार्यमिति न
17 तेनावदेयमित्याह य स्विति ननु स्विष्टकृदादिराशर्थेऽव्यातरोपातिः किं न स्यात्तत्राह न चेति ननु स्विष्ट
कृत आश्रयिकर्मत्वेन अपूर्वार्थस्यापि सत्वात्तत्सिध्यर्थं द्रव्यांतरमयुक्तिः किं न स्यात्तत्राह यद्यपी
ति। एकदेशद्रव्यत्वात्परप्रयुक्तद्रव्योपजीवित्वात् अप्रयोजक इति तथा च तद्रव्यार्थवत्तनाशेन लोप ए
वन्याय्यात्मा मइत्यर्थः। तत्प्रोज्येनापि तदनुष्ठानं न स्यात्तत्राह वा चानिकेनेति। सत्रे पुनरवदानव्या
वृत्यर्थोपि वाशब्दः लोपशब्दस्याध्याहार्यः तथा च शेषभाजां स्वार्थावत्तनाशेन पुनरवदानं किंतु
लोपः स्यात्॥ प्रतिपत्तिरूपविशिष्टप्रयोजनकारणकत्वात्तदनुष्ठानस्य प्रतिपाद्याभावे प्रतिपत्त्य श्रीरामः
योगात्॥ निर्दे॥ परिसंख्यार्थमिति। यजमानस्यापि कर्तृत्वात्कृत्विक्त्वस्यापि प्राप्तत्वात्तन १७
द्विध्यर्थं वचनमिति भावः। अन्येष्विति शंयुवाककालभक्षेष्वित्यर्थः। चतुर्धाकरणाभक्षणस्यादर्श

ह्मण इत्यादिनिर्देशसामर्थ्येन ऋत्विक्कर्तृकत्वात् प्राशित्रभक्षणस्यापि प्राशित्रं ब्रह्मणोप
रिहरतीति ब्रह्मकर्तृकत्वाच्च तत्रान्यकर्तृकत्वासंभवात्। यजमानस्येति न हि भक्षणं कर्तृसंस्का
रः येन कर्तृत्वमात्रेण यजमानस्यापि स्यात्। किंतु द्वितीयानिर्देशाद्द्रव्यप्रतिपत्तिः। एवं च प्रतिपत्त्य स्य
र्थस्य भक्षणस्य कर्त्रपेक्षायां कर्मकरत्वेन उपात्तानामृत्विजामेव प्राप्तिर्न यजमानस्येति भावः। सू
त्रे भक्षोऽन्यैः कार्यः यजमानपंचमा इडामिति निर्देशात् यथा सर्वस्य होमे प्राप्तेऽवदानमात्रस्य
निर्देशाद्धोमस्तथा॥ अर्थ॥ पूर्वत्र कादाचित्कानामन्येषामग्रहणेपीह कादाचित्कः कृत्स्न
भेद एव यात्येत्युक्त्या नाङ्गक्षणस्य द्रव्यसंस्कारत्वं होमस्य भिन्नसंस्कारत्वमित्युक्त्याना
त्वसंगतिः प्रथमपक्षसिद्धांतौ इष्यते न हीति भेददोषेति यद्यपि भेदे सति दोषोऽस्तीति न प्रत्य
क्षं वचनं वास्ति तथापि वक्ष्यमाणन्यायेन सन्निपातित्वसिद्धेः तन्निर्वाहार्थं दोषः कल्प्यत इत्याश
यः। ननु सप्तमीबलान्निमित्तत्वमेव न तु संस्कार्यमेवत्वं तत्राह सन्निपातेति द्वितीयार्थे सप्तमी
प्रबलसन्निपातित्वलाभेन प्रेयसीत्याहिर्वलस्य सप्तम्या लक्षणा न दोष इति भावः। वाक्यमिति नवस

श्रा॰ ६ गम्यादि द्वितीयार्थत्वे विभक्तिश्रुतिरेव विनियोजिका न वाक्यमिति वाच्यं। लक्षणा हि समभिव्याहारमूला
१८ तेन लक्षणास्थले तन्मूलवाक्यगम्य एव विनियोगो न लाक्षणिकविभक्तिगम्य इति भावः। तद्दैव
ति एवं च यस्मिन्पक्षे निमित्तत्वाभावात्संदेहो पन्यास मयेऽत्रैकदेशभेदनमित्येकदेशभेदनस्य
18 निमित्तत्वोक्तिर्होमप्रयोजकत्वाभिप्रायाद्वो ध्याननिमित्तपरत्वं स्यादिति नेदं द्वितीयपूर्वपक्षिणो
निष्ठापादनं तेन निमित्तत्वानंगीकारात् किंतु नित्यत्वोपपादनमात्रपरं सत्रे एकदेशविभित्रे प्रा
यश्चित्तं स्यात्। सर्वस्य भेदनस्य तत्रापि समवायात्॥ क्षामे॥ क्षायति दग्धो भवतीति तद्धविः दग्ध
पुरोडाश हविष्कोयागः संतिष्ठते समाप्तो भवति अथ तद्देवहविर्निर्वपेत् पुनः प्रयोगः कार्य इत्यर्थः।
तस्मादिति। न च सर्वक्षाणेतस्य हविष एवाभावात् तद्धविः संतिष्ठत इत्येतल्लक्षणमुपपद्यत इति
वाच्यं। सपुरोडाशो हविर्यस्येति बहुव्रीहिणा तद्धविः शब्दस्य यागपरत्वात् यागस्य संस्थान सं श्रीराम॰
बंधात्तथा च सर्वक्षाणेऽपि यस्य सर्वांशेन हविषो निवर्तनादाज्येन तद्धविरूपलक्षितयागस्य १८
समाप्तिः संभवतीति न कश्चिद्दोष इति भावः। यथा। यत्राधिकरणे उद्देश्यविशेषणोविवक्षाया।

उक्तत्वात्। पुनरुक्तिरित्याशंक्य उभयत्वस्य विशेषणत्वमंगीकृत्य तद्विवक्षितं नचेति न विचा
र्यते किंतु उभयत्वं निमित्तान्तर्गतं नवेति निमित्तान्तर्गतत्वे निमित्तस्वरूपस्याविवक्षितत्वात्। तदु
नर्गतत्व उभयत्वं विवक्षितं न चेत्तेति तन्नो न पुनरुक्तिरित्याशयेनाह यद्धेति एवमिति। प्रथमं पस्य
ति। श्रुते निमित्तबुद्धिरुत्पद्यते। तत्र चयस्य तस्य किमित्यपेक्षायामुभयमिति संबध्यते। किंतु
भयमिति। हविरिति एवमपि निमित्तबुद्धेरपर्यवसानात् हानिं माच्छेदिति संबंधः इति सर्वमेव निमि
त्तशरीरांतर्गतमिति भावः। आम्नानादित्यनेन आर्थिकस्य कार्यस्य निमित्तशरीरांतर्गत
त्वेष्टुतस्य उभयत्वस्य किं वक्तव्यमिति सूचितं येन विना निमित्तप्रतीतिर्न पर्यवस्यति तदेव निमि
त्तस्वरूपांतर्गतं। इतरत्तु प्रथमावगतमर्थानपेक्षितत्वात्। अविवक्षितमित्याशयेनाह यद्धेने
ति। तथापस्य हविरिति हविर्मात्रं निमित्तं न भवति नित्यत्वादित्यर्थः। ननु हविषु असमस्तत्वादिति।
समासे सेकार्थीभावात्परस्परान्वयनियमो न तु व्यास इति भावः। असंभवादिति। निमित्तयोरु
द्देश्यत्वेन प्राधान्यादिति भावः प्रत्येकेति। प्रति निमित्तं नैमित्तिकबोधनाय वाक्यावृत्तेरपे

श्रा०६ क्षितत्वान्मत्सुद्देश्यं वाक्यसमाप्तिरितिभावः। ननु कारकत्वेन विभक्त्युपस्थाप्यानामेव परस्प
१९ रासंबद्धानामाख्यातसंबंधः कारकाणां क्रियान्वयनियमात् इह तु प्रातिपदिकातिरिक्ता
र्थे श्रूयमाणपदोपस्थाप्यत्वान्मिथोन्वयो न विरुद्ध इत्यत आह यद्यपि चेति हविः स्वरूपं चेति। उभयो
19 पलक्षितं हविर्न तु तद्विशिष्टमित्यर्थः। अनुरक्तं विशिष्टं। पदद्वयमिति आर्तिपदमुभयपदानुरागं
पावन्न विलंबते उभयोपादं चार्तिपदान्नुरागेन विलंबत इत्यर्थः। ननु तर्हि आर्तिरेव निमित्तं तत्र
च आर्तिपदमुभयपदानुरागेण विशेषणत्वादुभयहविः शब्दार्थयोः परस्परान्वयमसंभवादु
भयत्वविशिष्टहविरार्तिर्निमित्तमिति स्यादिति शंकते अथार्तिरेवेति आर्तेः क्रियायां विशेषण
त्वेपि न परस्परमन्वयः तस्याः क्रियायां निमित्तत्वेन तद्विशेषयोः साहित्यस्य विवक्षितुमशक्य
त्वेन परस्परवैशिष्ट्यायोगादिव चोपादेयक्रियासंबंधिनामेव परस्परान्वयो नोद्देश्यक्रियासं श्रीरामः
बंधिनामिति परिहरति न यावीति हि रुचारणादिति आर्तेरिति शेषः। ननु भिन्नसन्निपाताव १९
प्युभयत्वं विधेयत्वया विवक्षितमस्त्विति तत्र स्थशंकायामाह तत्र यदिति अनपेक्षितत्वादपि न

विधिरित्याह परिच्छेदकत्वेनेति इत्यादिति उभयत्वेन हविः स्वरूपे विधेयं सिद्धत्वान्नाप्याग्निवि
शिष्टे विशिष्टोद्देशदोषात् तथा चात्रातीव पिन तद्विधेयं तत्रापि वाक्यभेदादिदोषादिस्तन योग्रहे क
त्वविधिपक्षदोषतुल्याः सर्वे दोषा इत्यर्थः। ननु हविरार्तिमात्रस्यास्य निमित्तत्वे उभयपदानन्व
यस्तत्राह उभयपदं चेति॥ होमा॥ हविरुभयः उभयत्वेनैव होमाभिधयोरपि न परस्परेण विशेष
णमिति संगतिः। उद्देश्यत्वादिति। न च निमित्तत्वादिति भावः। भक्षणं प्रतीति भक्षणं प्रति प्रत्ये
कमेव निमित्तत्वेन स्थीयत इत्यर्थः। वाक्यभेदेति यद्यपि निमित्तभेदे श्रुतिनिमित्तं वाक्यप
रिसमाप्तेरवर्जनीयो वाक्यभेदस्तथापि निमित्तं वाक्यं पुनरपि भिद्येतेति तात्पर्यं प्रयोजनेति। प्र
योजनान्तरार्थमनुष्ठेतव्योः सतोस्तत्कर्तृभक्षणमनुतिष्ठति चेत्तयोः समेतोरेव भक्षणं नान्यथे
त्येवमर्थोन्न योर्निमित्तत्वमित्यर्थः। ननु शाखामिति यच्छब्दाद्यभावादिति भावः। विवक्षितस्तात्वमि
ति उभयसमानकर्तृकत्वविशिष्टभक्षविधौ अर्थात्स्वाहितयोर्निमित्तत्वं पर्यवस्यतीति भावः॥ सि
द्धान्तप्रयोजनमाह अन्त इति तथा च मध्यतः कारिच मसेष्वच मसाध्वर्यूणां होमकर्तृत्वेपि न भक्ष

शा॰ ६
२०

णांतयाश्चाध्वर्युश्चेति यस्याश्वादीनांन सर्वत्रापि भक्षणमित्यर्थः। सत्रेत इत्यादितिवत्। पुना। सर्वत्रा
र्थिकत्वान्निमित्तभावस्य पंचरावन्यायानवतारेणेहेतत्संभवान्न विशेषणाविवक्षेति संगतिः। अ
नुगमो नाशः। अभिनिम्नो चेत्सर्वेषामियान्न याथ्यथोद्भयत्व विवक्षेत्याह नैमित्तिकमिति। पुनरा
धेयमिति। पुनराधेयमेव तस्यप्रायश्चित्तं शिखस्वकारेणायमाधुक्त्वापेयमेव संमुक्त इति च तत्र सिद्धा
भेदज्ञापनेनकर्मान्तरत्वाभावात्प्रसिद्धस्य चोभयोः साधकत्वात्। अन्यतरानुगमे वोभयोस्तस्य योगा
द्धभयानुगम एव निमित्तमिति भावः। नन्वग्न्याधानदधीनेषु सिद्धत्वस्य चोद्देशगतत्वाद विवक्षि
त्वेकान्यत्र स्यादनेपितत्समर्थमेवेत्यत आहतं चेति आहवनीयाद्युद्देश्य स्वरूपस्य प्रागनिर्ज्ञात
त्वेन अनिर्ज्ञातोद्देश्यगतसंख्या साहित्ययोश्च समसाध्वर्युबहुत्वन्यायेन विवक्षितत्वान्नैकान्यु
स्यादनसामर्थ्यमिति भावः।। पंच।। ईप्सितमिति। अपेक्षितविधिर्युक्त इति भावः। लाघवं चेति।। वि श्रीरामः
शिष्टकर्मान्तरविध्यपेक्षयेति शेषः। बहुव्रीहिणेति। विधिसंबंधात्पूर्वमेव बहुव्रीहिणा विशिष्टमाण २०
विशिष्टोदनावगतेस्तस्य विशिष्टस्य सकृद्विधिव्यापारेण विधातुं शक्यतया तत्र विध्यावृत्तिप्रसक्त

वाक्यभेदापत्तेरित्यर्थः। एवंचयथापूर्वत्र विशिष्टोद्देशेपि न वाक्यभेदः। एवमिहापीति संगतिः।
स्यान्नापत्त्येति। यद्यपि दोहप्रतिनिधिः पंचशरावस्तथापि तत्कार्यकरत्वमात्रेण स्यान्नापत्त्येत्यु
क्तेः। नित्यानुवाद इति। महेंद्रस्यापि इंद्रत्वादित्यभिमानः। महेंद्रस्येति इंद्रमहेंद्रभेदस्फुटतया शास्त्राधि
करणे स्फुट इति भावः। नच पूर्वपक्षेपि प्रक्रांतकर्मणो नैमित्तिकद्रव्यांतरेण समापनेपि प्रयोगांतर
स्मेह विषेवत्स्यान पाकुर्यादिति पुनः करणावश्यंभावादनुष्ठानाविशेषात् इदं निष्फलमिति
वाच्यं। पूर्वपक्षे पंचशरावोदने सान्नाय्यधर्माः सिद्धांते नैवोषधर्मा इति प्रयोजनभेदात्। तत्र। आ
संगिकत्वं सूचयति। नहि हमिति। पंचशराव इति यागद्वति शेषः। प्रत्यामनेन न स्वयं तत्कार्यकर
णान्निर्वर्तयेदित्यर्थः। प्रयोगांतर इति। आरब्धं कर्मोव अयं समाप्य नित्यसंस्कृतेनापि लौकिकेन द्रव्ये
ण समापयितुं शक्यते इह तु अप्रयोगान्तरस्मेह विषेवत्स्यान पाकुर्यादिति वचनात् संस्कृमेव तद्दत्तीत्यर्थः।
न हि पंचशरावयागो विश्वजिन्न्यायात्स्वतंत्रे फलः स्यात्। तत्राह द्वयोरिति प्रकरणादंगत्वबोध्यं। अत्रापि
अप्रयोगान्तरस्मेह विषेतिवचनबलेन पुनः प्रयोगस्यापक्षद्वयेपि सत्वादनुष्ठानविशेषाभावेपि पूर्वपक्षे

श्रा०६
२१

दर्शे स्यान्नापत्स्यात् इदुर्मेति नियमः। ननु सिद्धांतेन तथा पंचशरावयागश्चेषे प्रवेशहेतुत्वेन नैयायिकप्राप्ति
न्नमिति विशेषः॥ विश्व॥ आगुरते उद्युक्त इत्यर्थः। सत्त्रांगं होति। अत एव पूर्वं वदिहाप्यंगत्वमिति संग
तिः। सिद्धांतयति निमित्तेति। कर्तृसमानाधिकरणयत्नहेत्वर्थः। साधारण्येति। उद्देश्यत्वाप्रहेतुत्वसा
धारण्येत्यर्थः। सत्रेष्वत्र अहीनेषु विश्वजिन्न्याय इति भावः। सत्रफलभवनं कर्मणि विश्वजिति स्यात्। वत्स।
वत्सो व्रतांगे व्रतफलस्थितः कालो वेत्येवमंगांगित्वविचारपर्यावसितस्यास्य नात्र संगतिरिति शंक
ते कः पुनरिति। नहि। न वत्से निधाय व्रतनेतृत्वेनोवीतुपपत्तिरिति भावः। व्याघात इति। मांसत्वादिति
भावः। विध्यंतरैकवाक्यताभंगप्रसंगादर्शिना स्यवत्सविधायकत्वमित्याह विध्यंतरेण चेति। अपाकर्तोः
अपाकरणात्। एवं च पुरा वत्सानामपाकर्तोरिति विधिप्राप्तकालानुवादेन तदेव वाक्यत्वमस्य वाच्य
मिति कालक्षणेनेत्याह। अत इति। तत्रैव वत्सेरमावास्यायामिति वत्सव्रतसंयोगे वत्सविशिष्टव्रतवि श्री एमः
धिः स्यात्॥ कालः। नान्विति अ सोमयाजिनोऽग्नीषोमीयाभावादिष्टिरेकपुरोडाशा तत्र यदन्वाचोपुरो २१
डाशा उपांशुयाजमंतरयजतीति पुरोडाशद्वयांतरालकाले विहित उपांशुयाजः कर्तव्यः। पुरोडाशयागा

भावेपितदुपलक्षितान्तरालकालस्यानपायादितिदृश्यमेवश्यतोनन्यायेनात्रापिवत्सापाकरणाभावे
पितदुपलक्षितकालसंभवाद्दर्शनयतोपिवृत्तं स्यादित्यर्थः॥ आग्नेयेनेति। आग्नेयोत्तरकालस्योभयां
तरालकालत्वात्तत्कालस्तत्राग्नेयेनोपलक्षयितुंशक्यत इत्यर्थः। नहिवत्सापाकरणस्वरूपेणोपल
क्षणंसंबंधाभावात्किंतुस्वकालद्वारातच्चभावेपिसंभवतीत्याह सर्वथेति। तत्रेतस्यकालस
यल्लिंगेविनष्टेतत्संयोगात्। प्रस्त। विचारफलमाह प्रहरणांगत्वे इति। ननु चतुर्थ एव शाखा
प्रतिपत्तिः। प्रहरणमित्युक्तेः पुनरुक्तिरित्याशंकातत्रहि शाखायानयनेसाहित्यंकिंतुस्वत
वित्वेतावत्तेवतात्पर्ये अत्रत्वमेवतु प्रतिपत्तित्वंनतत्रव्यवहितमित्याशयेनाह चतुर्थे इतियजिरूप
त्वादिति। स्रुक्वा केनप्रस्तरंप्रहरन्तीतिन्नतीयाविनियुक्तमंत्रसंयोगनत्प्रतिपाद्याग्न्यादिदेव
तासंयोगाद्यजित्वस्यतृतीयेप्रतिपादनादितिभावः। नन्वेवं सहशाखावगतंप्रस्तरस्तोत्वंविरुध्ये
तत्राह अयमिति। एवं च सहशाखः क्रियान्वयमात्रेकालपरः नतुप्राधान्येपि सहयुक्ते प्रधान
इतितृतीयाविधिबलादितिभावः। शाखायाः सर्वा इति। दृष्टोपकाराभावेपिशाखायाः साहित्यादृष्टोप

शा॰ ६ कारः पयसां सेत्रावरुणं श्रीणातीतिवदिति भावः। इहशामिति। प्रस्तरप्रहरणस्य निर्ज्ञातकालत्वा
२२ दितिभावः। ननु सह शाखेति निपातादेवाकथं चिन्त्येष्यत इत्यत आह किंचेति। अपेक्षत इति। वि
हिते शारीक्षीकरणाद्यं प्रतिपत्तिरपेक्षत इत्यर्थः। अतोपीति अहणार्थं तदोषसमुच्चयार्थोपि शब्दः।
एवं च शाखाप्रहरतीत्येतावति वक्तव्ये तावत्युक्ते शाखाप्रहरणमनियतकालं स्यादिति। प्र
स्तरप्रहरणकाले शाखाप्रहर्तुं सहवचनं। तत्र च शाखाप्रहरवे सेतावति वक्तव्ये तावत्युक्ते
शाखाप्रहरणं च सहकुर्योदित्येतावत्युक्ततः प्रतिपादितेन तथा च सति निर्ज्ञातकालस्य प्रस्तरप्र
हरणस्य अनिर्ज्ञातकालशाखाप्रहरणकालोपलक्षकत्वमार्थिकत्वमेवेति शब्दस्तथा प्रती
तेरविवक्षितान्तप्रस्तरेण सहशाखाप्रहरतीति दृष्टावचनप्रसक्तिरित्याशयेनाह सहवच
नेनेति। फलद्वारा प्रासंगिकत्वमुक्त्वा साक्षादाहयद्वेति। न चैवं प्रवर्तनेन विधिकरणेन संग श्री गण॰
तिः स्यान्न पूर्वेणेति वाच्यं। बन्धापाकरणोपलक्षितकालस्य पूर्वाधिकरणविषयतया उपल २२
क्षणसंबंधस्य पूर्वाधिकरणेन संगतिः स्यान्न पूर्वे॰ पि सत्वेन उपलक्षणप्रसंगेन तत्संगत्वादि

ति भावः ॥ ॥ इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्याने प्रकाशाख्याने षष्ठाध्यायस्य
चतुर्थः पादः ॥ ॥ अथ तृतीयपादोक्तद्रव्यापचारानुषंगागतद्रव्यापचारनिमित्तप्रायश्चित्ताधि
कारनिरूपणानंतरं पशिशिष्टकालाद्यपचारनिमित्तप्रायश्चित्ताधिकारनिरूपणात्पादांतरत्वमानंतर्यं
च स्वकाल इति चतुर्दश्याममावास्यायां त्वा प्रक्रांते इत्यर्थः। इष्टमिति। मध्यमादिवाक्यविहिते इत्यर्थः।
उक्तेति। उक्तत्रेधावाक्ये नायनयोमध्यमादिवाक्येन प्रक्रांतदर्शेष्टियागसंबंधिनो हविषो देवतांतरसंयोगस्य
चोदितत्वादित्यर्थः। मध्यमादिवाक्ये देवतांतरसंयोगविधिरित्येव सिद्धांतकोटिरपनेयविधिस्तु नहेतुत्वादु
क्त इति विवेकः। ननु श्रुतत्वान्मध्यमादिभावेन विभागस्त्रेधावाक्ये विधेय इति पूर्वदेवतापनयाभावे
न देवतांतरविध्यसंभवात्कर्मांतरविधिरेवन्याय्य इत्यात आह तथा हि त्रेधेति। अत इति विभजेदित्यस्य
कर्मापेक्षायां सामर्थ्यात्संयुक्तं गम्यते तेन स्वविशेषापेक्षायां प्रकृतं हविरिति केन संयुक्तमित्यपेक्षायां पूर्वदेव
ताभिरित्येतावतोऽर्थस्यावगतत्वात्तंडुलशब्दोऽवगतार्थतानुवादत्वात्प्रकृतदेवतासंबंधिहविर्मात्रोपल
क्षकस्तस्य च हविषस्तंडुलदधिपयोरूपेणावायागत्रयसंबंधेन वा त्रित्वात्त्रेधेत्यनुवाद इति भावः। स्य

श्रा० ६
२३
23

विष्ठानां दध्नश्चेति। यद्यप्यत्र प्रत्युद्देश्यं वाक्यसमाप्तेर्वाक्यभेदोऽस्ति तथापि कर्मान्तरविधिपक्षे हविषः उ
पादेयत्वात्याग्रहणत्वग्रहणेऽप्रमाणाभावेन पूर्वपक्षे हेवतापनयविस्म्रापेक्षो वाक्यभेदोऽस्ति। तथापि विधेरनपेक्षितत्वा
न्न्वेक्षा तंडुलानितिवाक्यमनर्थकं स्यात्। विधेयानेकाभावात्। एवं च वाक्यानर्थक्यादरमेतावाक्यभेद इ
त्यभिप्रायः। अनेनैवाभिप्रायेणोक्तं नेत्ररत्ने। प्रत्युद्देशवाक्यसमाप्तिः स्यादेव। सा च अंगीक्रियत इति
द्रात्वात्त्वाद्द्विगुणाधिकरणत्वचरुत्वविधिनिर्बंधनेवाक्यभेदप्रसंग इति नेत्रेत्यादिना। अतेयेवेति दात्रादिपदा
नां योगिकत्वेन दानकर्त्रीदिद्रव्यवाचित्वात्सन्निहिताग्न्यादिगामित्वाच्चेति भावः। सह श्रपणेऽप्रभूतस्य इव
द्रव्यस्याधिकरणत्वं चरुत्वं चार्थप्राप्तमित्याह अभ्युदये इति। संप्रतिपन्नदेवताके प्रोक्ते देवताकयोरि
त्यर्थः। यजमानः किं चतुर्द्दश्यामेवमपाप्रक्रांतेन तत्र्यैव इमामामभ्युषेदेष्यतीति बिभियात्त्रदामहारात्रेति
भागावशिष्टायां रात्रौ प्रयोगप्रक्रमस्य फलीकरणपर्यंतं कृत्वा उदयनदभावोऽप्रति। क्षमाणश्चासीत सायं दो
हनिष्पन्नं च यद्दधि तदेषा विभज्यार्धं प्रतिपादितस्वकालेकर्तव्यं दर्शार्थयद्धविस्तदातं च नाय्यं निदध्यादर्थे
न अर्थं तिरं नातं च नाय्यं निदध्यात्तत्प्रसीपरिपालयेदितियावत्। नन्देवं सति यद्यभ्युदियात्तदा आतंचना

श्रौ०एम०
२३

निहितेनार्थेन ब्राह्मणान्भोजयेदित्यर्थः । अर्थेनेति यत्नं स्मो निहितमर्थं तदभ्युदये दक्षस्वाह निमित्तेनैमित्ति
कविनियोज्यं । अभ्युदयाभावे यथाश्रुतदर्श एवेति भावः । यदीति यदि हि कर्मान्तरमेव अभ्युदये निमित्ते
विधीयते तेन दधिसृतयोः प्रदेयत्वाभावात्तन्मध्यात्र एणीताकार्यं हविर्निष्पत्त्यनुगुणपाकलक्षणवि
धानाच्चार्वर्थमुपादेयत्वेन प्रकृतग्रहणानुपपत्ते लौकिक एव दधिश्रपणाहृता नैमित्तिकस्यानुष्ठे
यत्वाच्च तद्दृश्यं संपादितं दधि तेनैव प्रतिपादितदर्शस्यानुष्ठेयत्वात् दध्यंतरोत्पत्तेरनपेक्षितत्वात्तेनानतचोप
त्यातं च नमनुपपन्नं । न चाकालहृतत्वात्तद्दधि न प्रतिपादितदर्शयोग्यमिति वाच्यं । नैमित्तिकप्रायश्चित्ता
नुष्ठानेन कालापराधदोषपरिहारादित्यर्थः । प्रकृतग्रहणे प्रमाणाभावे नार्थस्यापि नैमित्तिकः । क
र्मान्तरे विनियोगाद्दर्शनेति यद् धर्मान्तरं तदप्पनर्थकं स्यादिति द्रष्टव्यं । ननु तेनानं चैतिवचनदर्शमादेव
चतुर्द्दृश्यं संपादितं दधि परित्याज्यं दध्यंतरं चोत्पाद्यं । तत्राह तत्रेति । एतावन्मात्रमिति नियममात्रमित्यर्थः ।
तेन अनस्वतंत्राहस्य कल्पनाप्रसंगः । एवं च तेनैव दर्शप्रक्रांतप्रयोगस्यानतचतुर्वोभयमनुष्ठेयमिति उभ
यार्थदध्नो विभागार्थं द्व्यनिधानं चार्थवदिति भावः । प्रयोजनं पूर्वपक्षे अकालोपक्रांतदर्शप्रयोगस्य अको

श्रा० ६
२४

24

संकल्पयत्र प्रतिकर्मोनरं कर्तव्यं। सिद्धांते तु अकालोपक्रांत दर्शप्रयोगा एव देवतांतर संयोगरूपविकार
युक्ताः समापनीय इत्याह॥ उपा॥ पूर्वोक्त देवतापनयो हविर्विशेषः आज्यस्य समाधीयत इति संगतिः॥
कालविधिपरमिति। अपि वा पोर्णमास्यां स्यात्प्रधानशब्द प्रयोगादिति। दर्शमे सूत्रणादिति भावः। अयो
दशेति। संवषट्काराहवनीयादिति संख्येयं परिगणनं तु दर्शमे करिष्यमाणाः पूर्वपक्षमाह तत्रे
ति। सिद्धांतमाह तंडुलेति। लुप्यत इति न च प्रक्रांतस्यावश्यसमापनीयत्वाद्वलोप इति वाच्यं। अपन
हृतत्वाद्समाप्तेर्दोषत्वादिति भावः। सत्रे उपांशुयाजे देवतांतर संयोगस्यावचनाद्यथा प्रकृति
प्रकृत देवता संयुक्तमेव द्रव्यं स्यात्॥ अनि॥ उपांशुयाजस्य देहापि अक्रियेति प्रसवस्थानात्से
गतिः। विशेषद्वा इति। यथा कस्यचिद्देवस्य नित्यत्वात् द्रव्यस्य द्रव्यमसाविशेष्यते। एवं तस्यापि नित्यत्वात्
हविषा विशेषणीय इत्यर्थः। देवतार्थमसंकल्पितस्य यजमानद्रव्यमात्रस्य हविष्ट्वाभावाद्धविः पदाद्देव
तासंकल्पप्रतीतेरर्थादपि स्वपदप्रतीतं किं पालाभे श्रुतापि पदांतरगता क्रियाविलंबितोपस्थितिकत्वा
न्न ग्राह्येत्याशयेनाह नैवमिति। अकालप्रहृतिमात्रमिति अकाले कर्मोपक्रममात्रमित्यर्थः। कर्मोपक्र

श्रीरामः
२४

मस्यदेवतासंकल्पमज्जीकरणादिक्रियाव्यासेस्तस्य निमित्तत्वोक्तावविरोधः। अनि। निमित्तगत
निरूप्यत्वेऽपस्य प्रवृत्तिक्रियोपलक्षकत्वोक्तं तरं नैमित्तिकगतं तेनुल्लघातृस्याप्युपलक्षकत्वकथना
त्संगतिरिति सूचयन्नाह कर्मेति। आहुतीभ्यः अग्नये इन्द्राग्नीभ्यां चेत्यर्थः। देवताभ्यः स्वात्रग्न्यादि
भ्य इत्यर्थः।। विनि। इह प्रवृत्तेऽपि हविष्यभ्युदयेन पूर्वदेवतापनयो देवतान्तरसंयोगो वेत्युभयथेतेः संगतिः।
अवयवेपीति। चतुर्मुष्टिनिर्वापस्यैव पदार्थत्वात् तन्मूलनिर्वापस्य तद्वयवत्वादिति भावः। संभवादिति·
अथ मे चतुर्मुष्टिनिर्वापात्मके कृत्स्नपदार्थमभिसंधाय प्रवृत्ते तस्य तदेकदेशानिर्वापसमये प्रा
कृतीभिः संयुज्य स्थितत्वात् तद्वयवे प्यविशिष्टनिर्वापेतदेवतासंयोगस्याविनापि शास्त्रमवर्जनीय
सिद्धत्वाद्विभागस्य च संयोगमात्रापेक्षत्वात् द्वयवस्य विभागः संभवतीति न तु देवतान्तरसंयोगस्तस्य शा
स्त्रतदेवतास्थानापत्तिनिबंधनत्वात् प्राकृतीनां च शास्त्रतः कृत्स्नेनैव पदार्थेन संयोगादित्यर्थः। नु
चेति तदाकृत्स्नानिर्वापप्रतिसंधानस्याप्यभावादिति भावः। सूत्रे विनिरुप्ते सामि निरुप्ते हार्थे न संयोगादि
त्यर्थः। नचेति तदाकृत्स्न चतुर्मुष्टीनां एकदेशस्य पूर्वदेवतापनयः कृत्स्ननिर्वापस्य देवतागुणत्वादेके

शा० ६ २५ हेशासंभवात्॥ सान्ना॥ सामिकन्नेवैकृतीनांपदार्थसंयोगासंभवान्निवापनिह्रस्विवदसंनयतोदधिश्रु
तयोरसंभवान्नेमित्तिकनिवृत्तिरित्युस्थितेः संगतिः अवदानेतिःयद्यपिप्रथमाधिकरणएवदमनु
वादइत्युक्तंतथाप्यनुवादोप्यसंनयतोनसंभवतिकिंचसहअयनीतिवाक्यंहत्वविशिष्टअवदान स ३
विधायकमित्युक्तंअसंनयतश्चद्व्यांतरसहितपाकोपसंहारासामर्थ्यान्नास्त्यभ्युदयेष्टिरिति
तसहि भावः।ननुतथापिदधिश्रुतानामेवतंडुलानामुद्देश्यत्वादसंनयतोनैमित्तिकाभावतादवस्थ्यमि
95 त्यतआह।नचेतिअतइतिविधेरविशेषावगमादनुवादः सहपाकस्यसन्नयसत्वेभविष्यतीतिभावः।
सामस्तु॥ असंनयतोपिनैमित्तिकेष्टिवदक्रीतराजस्यापिविश्वजिदितिसंगतिरित्याह। सत्राये
ति।सत्रार्थंदीक्षितानांमध्येयदिकश्चिद्दर्शपूर्णमासयोगसमयेत्रयोगंपरित्यज्यगंतुमिच्छेत्तदासमी
४२ हितसत्रफलार्थंप्रारब्धसत्रापरिसमाप्तिदोषोपघातायविश्वजितायजेतेत्यर्थः।नचेतिसत्रोत्था श्रीराम:
नेनिमित्तेसोमविभागविशिष्टविश्वजितोविधानादक्रीतराजकस्यचसोमविभागाभावेनक्रीतराजकस्यचसोमविभागाशक्तेरयोक्री २५
तराजकोपेमेनिमित्तमिति।तस्यैवायंविश्वजिदित्यर्थः।दीक्षा॥ परिमाणविचारस्यन्यायेष्विवदा

ज्ञान श्व२

धिकारविचारश्च स्याद्वा सांगस्य माशंक्याह नेमिश्रिके ति इत्येवमर्थमिति। इति करिष्यमाणो
यो विचारस्तदर्थमित्यर्थः। भृतिं दक्षिणार्थद्रव्यं दक्षिणत्वेन याचेतेत्यनुयाचन इति धातोः। असंभ
वादिति। नच भृतित्वेनैव परिक्रयविधिसामर्थ्यप्राप्तत्वादविधेयं तेन प्राप्तेर्वचनेन द्वादशाहं रात्रीर्णो
दीक्षितस्य च विध्यसंभवात् द्वादशरात्रीरित्यस्याविवक्षितत्वात्कथं पक्षांतरेषु भृतित्वेनास्यासंभव इति वा २४
च्यं। भृत्यर्थद्रव्यार्जनस्य प्राप्तत्वेपि याचनस्याप्राप्तत्वात् द्वादशरात्रीं दीक्षितकर्तृकयाचनविधिसंभवा
२६ दिति भावः। अयुक्तमिति। भृतित्वेनास्य पक्षांतरेष्वसंभवे एकस्य भृतित्वेनास्येवोत्कर्षो न्याय्यः नतु २९
बहूनामेकादिपरिमाणानां नैव भृतित्ववचने नं मुख्यं मानाभावात्। सत्यपि मुख्यत्वे मुख्यं बहूनां २५
च विप्रतिषेधेव ह्वनुग्रहः एवं नपरव्यानुग्रह हृदमिद्वा हशेवक्ष्यमाणत्वाद्दिति भावः। ननु लिंगस्या
नर्थकत्वाशानर्थक्यात्प्रतिहतानामिति न्यायेन प्राबल्याभिप्रायेनेत्याह लिंगत्वेति पाक्षिकत्वमे
व होषं मत्वाह युद्धेति द्वादशरात्रीरिति वाक्ये दीक्षितकर्तृकयाचनमेव विधीयते ननु द्वादशरात्र
दीक्षितकर्तृके गौरवादिति पक्षांतरेष्वपि भृतित्वेनैव नमुपपद्यत इत्यर्थः॥ द्वाद॥ प्रकृतिवदिति संग

शा० ६ तिः स चिन्त्य। द्वादशरात्रो दीक्षितं स्यादिति प्रत्यक्षवचनं नास्तीति कृत्वा चिंतेयं षट्त्रिंश इह इति वाक्यं न
२६ विधायकम् अन्यशेषत्वात् अहर्तो स्मादाहैदीक्षा द्वादशान् प्राप्तिरित्याशयेन लिंगादित्युक्तं न तु लिंगमात्रा
न्नवस्के आह नयेति।। पौर्णा।। कस्मिन् काले गवामयनदीक्षा कार्येति कालविनियोगचिंतायाः अत्रा
संगतिमाशंक्याह दीक्षेति। दीक्षिती यप ज्योन्मेषार्थे चैत्री। उक्तत्वेन युक्तिः चेत्र्यास्त्विति चैत्री उक्तत्वे दीक्षापौ
र्णमासे दीक्षेरन्नित्येतत्तु षत्वेपि समनंतरमेव कीर्तितत्वेन सन्निहितत्वाच्चैत्र्यां बुद्धौ विपरिवर्तमा
नायां श्रयमाणः पौर्णमासीशब्दः कृत्स्न विषय एव भवति न सर्वपौर्णमासी विषय इत्यर्थः। अस्कृत्वा स
र्वासाम् अपि हृस्वाष्टमी नामेकाष्टकात्वं तथापि तेषामष्टकायां क्रयः संपद्यत इत्यत्र न सर्वासां ग्रहणं।
उपक्रमे संवत्सरपत्नीत्वेन याश्रुता तस्या एवात्र ग्राह्यत्वात् संवत्सरपत्नी च माघकृष्णाष्टम्येव मंत्रव
का ३ र्णादिति सेव क्रयवाक्यगतैः ष्टकाशब्दार्थ इत्याह किंचेति क्रय संपत्येति पौर्णमास्याः पुरस्ताच्चतुर
हे एकादश्यां दीक्षायां एकादशीमारभ्य सप्तमीपर्यंतेषु द्वादशदीक्षा निवृत्ताइति दीक्षानंतरं कर्तव्य श्री एम: २६
स्य क्रयस्य एकाष्टकायां संपत्तेरित्यर्थः। न च्छंबषट्कुर्वंति। नव्यर्थी कुर्वंति। किंच यस्मिन्काले आ

तर्जनाभवंतिसस्थार्तेः कालः तेकालमभिदीक्षयंत इति शीतार्तिकालाभिधानाद्यह्वार्तिं संवत्सर
विनाशमभिदीक्षंतइति संवत्सरांतिमकालाभिधानान्माघकृष्णस्यैवे त्याहकिंचेतितत्स्यादिति।
अत्र संवत्सराय दीक्षिष्यमाणाइत्यादेः कृत्स्नस्यैकवाक्यत्वादेक एव विधिरितिएकाष्टकायां दीक्षे
रन्नित्येकाष्टकायां दीक्षावचनस्य आर्तेवा एते अस्लंवा एत इतिच तन्निंदायाः फल्गुनीपूर्णमासे दी
क्षेरन्नित्यस्य तस्यैकैवनिर्याएकएवदोषइतितन्निंदायाः चित्रापूर्णमासेदीक्षेरन्नित्यस्यनकोच
नन्निर्याभवतीतितत्कृतेश्चसर्वेस्यापिविधेयमाघीपुरस्ताच्चतुरहकालस्कृत्यथैत्वा चैत्रीस्कृतिर
पिफल्गुनीपूर्णमासोक्तदोषाभावाच्चैत्रीयचापिपूर्वपक्षस्तानथापितदपेक्षयामाघ्यांपुरस्ताच्चतु
रहकालस्कृत्येथैत्वा चैत्रीस्कृतौ अपरस्तनरइत्युपपाद्नोयेतिभावः॥ दीक्षा॥ दीक्षाशब्दसंगा
गतेविचारानंतरं यद्देष्येदीक्षापरिमाणनिरूपितंतद्विचारानंतरंसंगतिः॥ मन्त्र। मात्वाग्निहोत्रानुष्ठानं
तथापिप्रतिहोमः कर्तव्य इत्युत्थानानंतरं संगतिः। सूत्रेतत्रपुरुषापराधादभ्रयोत्कर्षेपुरुषापराधप्र
भृत्यवभृथपर्यंतंकालेषु प्रतिहोमोनविद्यते। यथापुरुषापराधात्स्वेष्वेषां दीक्षाकालानांतरहृत्॥ अ

शा०दी०
२७
27

ति॥ हो होत्रे चकत्वादित्यनेन संगतिः सूचिता। सूत्रे अवभृथा इष्टिरिष्टेः प्राङ् न होमः इत्यंतरमधि
कारप्रतिपादकवचनेनाधीतत्वं वै प्रतिषेध्यातत्॥ अति॥ प्रासंगिकी संगतिः अतिपत्तिसमानार्थो
होमा एकस्मिन्नपि काले निपातः क्रमेणैवोपतिष्ठंते न युगपदित्यसति शक्तिप्रवृत्त्या क्रमनियम इति सि
द्धं तमाहयेनेति। अग्निष्टोमादिष्विति तेषामन्ते वावभृथादिति भावः। षोडशिनीति। तस्य रात्राव
वभृथादिति भावः। प्राय॥ यत्रेति। अग्निहोत्रज्योतिष्टोमादिष्वपीत्यर्थः। सूत्रे अधिकारे दर्शपू
र्णमासादिप्रकरणे श्रुतं। प्रायश्चित्तं दोषसामान्यात्सर्वं न स्यात्॥ व्याप॥ व्यश्नैनेवेति शब्दार्थनि
रूपणमात्रपरत्वात्पूर्वपक्षे। नातीवयति न व्याप्नोतीत्यर्थः। शब्दार्थनिरूपणप्रसंगात्संगतेमित्या
शयः॥ विभा॥ पूर्वं स्य शब्दार्थनिरूपणमात्रत्वान्तेनेन संगतिः पूर्वेनरेणवयथा भिन्ने जुहोतीति
प्रायश्चित्तं न सर्वत्र एवमपच्छेदे विचारसंभवात्। सूत्रे विभागश्रुतेः विभक्तेः प्रत्येककर्तृके अप
च्छेदे प्रायश्चित्तश्रुतेः॥ तत्र॥ पूर्वोपजीवनात्संगतिमाह यौगपद्य इति तल्लिङ्गमिति इहेतु यद्यपरपच्छेदयोः
प्रायश्चित्ते परस्परं विरुद्धे उद्गातयोपद्यत्वे बाध्यं। पौर्वा॥ नत्वेति। विद्रोपक्रमाधिकरणन्यायेन पूर्वस्य
२ छंदनिमित्तमपि नैमित्तिकपदयुक्त संगतिः· बहिष्पवमानमिति· बहिष्पवमानस्तोत्रार्थं हविर्धाना प्रसृप्तं बहिष्पवमानदेशे गच्छतो प
३ रस्परमनारंभः श्रुतः· अध्वर्युप्रस्तोतारं तत्रसहस्रोता सम्भाव्यते तस्यान्वारंभं प्रति हविर्धानाब्रह्माणं यजमानो यजमानं

श्री राम·
२७

वप्राबल्यमितिभावः।उपसंहारस्योपक्रमाननुगुणार्थकत्वेनतद्धेकवाक्यत्वानिर्वाहादन्यत्रोपक्रम
प्राबल्येपिइहउत्तरस्यपूर्वानपेक्षस्यपूर्वेणतुल्यत्वमितिमत्वापक्षांतरमाहविकल्पोवेति।ततश्चपूर्वेव
दिहापिसंगतिःमात्रेति।येनश्रुतिलिंगादिवत्सर्वेषांप्राबल्यंस्यादितिभावः।ननुशास्त्रद्वयहृत्रिवेलायां
तुल्यकक्षत्वाद्वैकल्पएवन्याय्यइतिशंकतेनन्विति।प्राभाकरास्तुस्यादेतदेवं।यदिकर्मज्ञापकशा
स्त्रावहिदसहृदेवबोधकंस्यादिहतुनेमित्तिकंशास्त्रंनिमित्तोपजननेप्रवर्तमानंनिमित्तस्याधि
काधिविशेषणत्वादधिकारहारकंसत्प्रयोगशास्त्रमितिप्रतिप्रयोगमाहसैवबोधकमितिप्र
योगभेदाश्रितेनपौर्वापर्येणासंभवतिबाधइत्याहुस्तन्मतमनुवदतियेपीतिप्रतिप्रयोगंशास्त्रा
वृत्तेरप्रतिप्रयोगमेकैकशास्त्रव्यक्तिःसंपन्नेतितत्रतस्ययोगशास्त्रव्यक्तेर्निरवकाशत्वापु
नरांबाधासंभवइतिहृषयातितेषामितिश्रयेतियदीत्यर्थः।परैरप्रामाण्यानंगीकरणेनपरकीय
शंकानुपपत्तिः।यजतिषुयेयजामहंकरोतिनानूयाजेष्वित्यत्रप्रतिषेधेविकल्पःस्यात्प्रतिषेध
प्राप्तिंविनाप्रतिषेधासंभवाद्यजतिषुयेयजामहेमित्यनेनानूयाजेषुयेयजामहप्राप्यनंतरंनानूयाजे
ना॰

शा॰ ६ २८ विधिनिषेधप्रवृत्तिरित्यन्यायेऽप्युपेयतामिह प्रवृत्तेः सामान्यशास्त्रकृताया अपि शास्त्रकृतत्वेनात्यं
तबाधायोगादिति विकल्पप्रसंगान्न्याये विधि(पर्युदास इति दशमे व्युत्पाद्यं तन्मते न युक्तं पूर्व
प्रवृत्तिशास्त्रप्रामाण्ये प्रतिषेधपक्षेऽपि नित्यमनुष्ठानोपपत्त्या पाक्षिकानुष्ठानापादकविकल्पाप्रसंगा
दित्याह तत इति साहसमिति अप्रामाण्यस्य परतस्त्वे न दोषनिमित्ततया तदभावेनासंभवादिति भावः।
किंचाप्रवृत्तस्य पूर्वशास्त्रस्य स्वार्थज्ञानजनकत्वनियमाज्ज्ञातस्यानुभवरूपज्ञानस्य प्रामाण्यनिय
माच्च तन्मते शास्त्राप्रामाण्याभ्युपगमः सुतरामयुक्त इत्याह [stain]तीति ननु श्रुतौ सत्यां लिंगस्यैव पू
र्वशास्त्रस्याप्रवृत्तिः किं न स्यात्तत्राह तद्धीति श्रुतौ सत्यां याह कथइणपहायोम्नानाचरितार्थ
त्वरूपसामग्रीहीनत्वाल्लिंगस्याप्रवृत्तिरित्यर्थः कोइहेतुनिमित्तस्याविद्यमानत्वात्संभृतसामग्री
कं शास्त्रं किमिति न प्रवर्ततेत्यर्थः। ननु निमित्तानंतरं पूर्वशास्त्रस्य फलसामग्रीकत्वात्स्वार्थनि श्री एमः २८
श्चयं करोत्येव सत्त्वनिश्चयो ज्ञानस्य मिथ्यात्वानंगीकारात्प्रमाणमेव प्रमाणस्यापि तस्य संभृ
तसामग्रीकप्रबलशास्त्रांतराद्बाधः न च पूर्वनैमित्तिकप्रयोगरूपविषयाभावे निर्विषयत्वा

नासंभव इति वाच्यं स्वविषयपरमार्थीकरणसामर्थ्यमेव हि हननात्मा स्वविषयत्वं न चात्रापि प्रबलो
क्तशास्त्रप्रतिबंधाद्विषयान्तु सत्त्वावपि विधत्त इति शास्त्रप्रवृत्तावपि बाधः॥ उपपद्यत इति चेदेवम
पि नान्यथा जैमिनिसूत्रप्रतिषेधेपि पूर्वं सामान्यशास्त्रं निश्चयं करोति स च निश्चयः प्रबलनिषेधब
लाद्विषयान्तु सत्त्वावपि स्वविषययथार्थकरणसमर्थनया स विषय इत्याश्रियपरेणपूर्वस्येव प्रतिषेधे
न सामान्यविधेर्निरवकाशबाध इति व्यक्तं शाकान्तेन पर्युदासप्रतिपादनानर्थक्यादेव हन्तोत्तरमिति भा
वः। यदि शाक्तो निपातितः आह त्यानिमित्ततामेव प्रतिपादयति न तु संप्रायवचनस्तेन नैमित्तिकेपि नि
मित्ते शास्त्रप्रवृत्तिर्न विहन्यत इति परेणाव्यक्तं शाकान्त्वान्त्वानीवेत्युक्तिः। निमित्तोपजननात्प्रागिति।
ननु प्रागन्यथाकर्तव्यत्वेनावगतस्य निमित्तोपजननानंतरमन्यथाकर्तव्यत्वावगमे द्वयोरपि ज्ञान
योर्विरुद्धफलपोर्वापर्येण प्रमात्वरक्तत्वज्ञानयोरिवप्रामाण्यं न संभवति बदरफले रूपद्वयस्य
कालभेदेन सत्त्ववद्धि हि पौर्वापर्येणोत्पन्ननिमित्तद्वयवशात् नैमित्तिककर्तव्यताद्वयस्याभा
वादुत्पन्ननिमित्तोपजननेन पूर्वनैमित्तिककर्तव्यतापहारात्तत्कथं पूर्वशास्त्राप्रामाण्यमिति

शा॰ ६
२९

चेत्तसंज्ञा न हि पूर्वशास्त्रस्य प्रकृतप्रयोगे प्रामाण्यमभिमतं येनोक्तदोषः स्यात्। किं तु प्रामा
ण्यमात्रं तत्प्रयोगान्तरे उपपद्यते न्यायाभासात्तु या पूर्वशास्त्रस्य सर्वविषयत्वप्रतीतिस्त
द्बाधे पितान्यविषयप्रयोगान्तरे प्रामाण्ये बाधकाभावात्। एवं च शास्त्रार्थावधारणवेलायां
प्रायोगिकपौर्वापर्यमालोच्य शास्त्रावधारणमात्रं न तु प्रतिप्रयोगं शास्त्रप्रवृत्तिरिति न काप्य
नुपपत्तिरिति भावः। सूत्रे प्रकृतिनिवृत्त्याधाकृतस्य कुशाद्दैवैकृतशरणाद्यपेक्षया दौर्बल्यं न द्रष्ट
व्यम्।। परनिमित्तत्वाय स्थितस्य कर्तव्यत्वं विना एतद्विचारासंभवेन पूर्वापेक्षत्वात् संगतिरिति सूत्र
यति पौर्वापर्येति। सूत्रे जघन्यः पश्चादुपस्थितः अवतर्यते पुनः प्रयोगे इति। तस्मिन्न्यतिप्रहर्षे संछेद
वतिप्रयोगे।। आह।। तणस्येति पूर्वस्मिन्नित्येतेन प्रयोगाभिधानात् पूर्वशास्त्रमपि यागान्तरप्र
योगे कार्तृणस्यैवाप्रवृत्तिरिति भावः। तत्र पूर्वस्मिन्नित्येतेन प्रयोगात् प्रयोगाभिधाने इह प्रवृत्तिः श्री राम:
स्यात् अतः पूर्वस्मिन्निति प्रयोगाभिधानमनुपपन्नमिति पूर्वोक्तोपपर्यवसानात् संगतिः। अथ शास्त्राद् २९
भेयजितिसामानाधिकरण्यात् समूहस्य यागत्वाभावात् समूहिनामेव फलं प्रतिबोदने तिभावः। तदाह

न्न गुणान्वितमितिकर्मण एकत्वेन पौर्वापर्याभावात्सर्वस्मिन्नित्यनेन प्रयोगे कावयिते न पुन
र्यजेतेत्यनेन कर्मण एवावृत्तिर्विधीयते न प्रयोगस्येति भावः॥ ॥ इति श्रीचम्पकनाथकृतौ शास्त्र
दीपिकाव्याख्याने प्रकाशाख्याने षष्ठाध्यायस्य पंचमः पादः॥५॥ ॥ सन्ति॥ पूर्वेषु पादेषु
प्रकृतिष्वधिकारः प्राधान्येनोक्तः। इह विकृतस्वधिकार उच्यत इति पादान्तरत्वमानन्तर्यं च। ननु दर्शे
न्द्रियकामस्येतिवत्पशुपश्वाः स्वामित्वावगमात्कांगत्वेन विधिस्तत्राह षष्ठीति। इन्द्रियकाममादोनन्या
यात्संबंधविशेषे पर्यवसानं। एवं च तद्धि हि प्रायुक्तफलकल्पनागौरवादिन्यायात्कर्तृत्वे पर्यवसा
नमिति भावः। नन्वेवमपि गोदासिपशुदासिषुकर्तृकोन वा सिद्धकर्तृकतया व्यपदेशार्हः। तत्राह स
त्रेष्वपीति। स्थितमिति। अत्रैव हि द्वितीयाद्यपाद इति भावः। धात्वर्थस्येति। न चोदाहृतवाक्ये धातोरेवा
भावात्कथं धात्वर्थविधिरिति वाच्यं। अत्रावश्यं विधिप्रत्ययस्य कल्पनीयत्वात्तस्य च प्रकृतिं विना
नुपपत्त्या तत्प्रकृतितया कल्पितस्य यजेः कृञो वा प्रयाज एव पर्यवसानाद्धात्वर्थविध्युपपत्तिरिति
भावः। ततश्चेति। राजन्यास्थुद्देशेन ना राशंससविधानस्य नाराशंसोपकृतः क्रतुर्वासिष्ठादीनामे

शा०६ न फलत्वं इति पर्यवसानात् हितरेषां फलालाभ इत्यर्थः। सत्रे बहूनां सन्निपाते तुल्यकल्पा एव यजेरन् तथा
३० त एव प्रकृतिवद्दैगुण्यात्॥ सत्रा॥ युगपद्धिति अधिकरणं द्व्यं अभिधेयमिति यावत्। तस्य पदद्वये
नापि युगपदभिधाने द्वंद्व इत्यर्थः। तथा च एकेन पदेन अर्थद्वयप्रतिपादने द्वंद्व इति कात्यायनोक्ता
30 द्वंद्वे पदद्वयलक्षणा स्यादित्यर्थः। तदर्थे स्येवेति। राजसंबंधिपुरुषस्येवेत्यर्थः। प्रथमेति द्वितीय
पक्षे एकराजसंबंधित्वार्थलाभार्थत्वेन आनर्थक्याभावात् प्रथमपक्ष इत्युक्तं भिन्नकल्पयोरिति प्र
तीपवादात्संगतिः सूचिता। सूत्रे वचनादेकस्य राज्ञः पुरोहितद्वयसंयोगः यथा सव्यपाणेः कर्मा
नुपयोगित्वेपि अञ्जलिना जुहोतीति वचनादेकपुरुषसंबंधिपाणिद्वयं गृह्यते॥ सत्रा॥ पूर्वोदिहा ६५
पि राज्ञोधिकार इति संगतिः आर्त्विज्यं ऋत्विजां कर्मेति कर्तृकाफलार्थी इति यावत्॥ ननु प्रकृति
५ तो ब्राह्मणकर्तृकत्वमार्त्विज्ये प्राप्तमिति। तथाविधस्येव यजमानसंस्कारा यजमानसंस्कारत्वोपि
न राजन्यवैश्ययोः प्राप्तिस्तत्राह प्रधानभूतेति। अप्राकृतमिति यजमानसंस्कारस्य प्रकृतित्वक्षम श्री एमः
त्वाभावाद्विधिभावः। नचान्यार्त्विकूपदस्य तत्कार्यलक्षणामाश्रित्य तत्र यजमानाः कर्तृत्वेन विधीयं ३०

तद्दित्यर्थः ॥ वा॰ सि॰ ॥ पूर्वत्र विशेषविचारात् संगतिः ॥ वि॰ ज्ञा॰ ॥ पूर्ववत् संगतिः ॥ पारायणादिति ॥ यजमान
संस्कारार्थत्वे हि सर्वेषां संस्कारसिध्यर्थं सर्व एवाहिताग्नयोऽभवेयुर्न त्वेवं ॥ क्रतुकर्मार्थास्तथा चोदुंब
रीसंमानन्नवध्यस्य कस्यचिदग्निषु कृतमपि कर्म सर्वेषां भवतीत्यर्थः ॥ अवस्थितेति ॥ पंचम इति शेषः ॥
सत्त्रे विहारस्याग्नीनामन्यदीयाग्नीनामप्यन्योपकारे प्रभुत्वादनाहिताग्नीनामपि स्यात् ॥ जुहु॰ ॥ दिष्ट
गतिर्मरणं विगुणः स्यादिति ॥ पुरुषान्तरीयमेयपात्राहानेमध्ये साधारणपात्रसंपादने च प्रयोगप्रासु
भावो भज्यतेति भावः ॥ सत्त्रे तु ह्यादीनां स्वार्थेन त्रयुक्तत्वाभागात् तद्विषये यथाकामी प्रतीयेत ॥ पुरु॰ ॥ स
त्त्रे अनाहिताग्निब्राह्मणक्षत्रियपयोर्नाधिकारकल्पादावधिकार इति संगतिः ॥ प्रकृते पंचदश्यावरु
द्धत्वान्नतत्र सामदृश्यविधिः ॥ धा॰ का॰ ॥ स्तत्राह नच्चेति वेकृतेरिति अश्वधारकल्यादिप्रकरणाम्नानेरित्यर्थः ॥
सत्त्रे पुरुषविशेषकर्तृकत्वेनाम्नातसामदृश्यकत्वेन विकृतावधारकल्यादिप्रकरणाम्नाने विद्रो
कर्तृनियमः स्यादित्यस्याधारकल्यादेः सामदृश्यगुणत्वाद्दितराहीन ब्राह्मणादीन्प्रति नदभावोत्सा
मदृश्यानाम्नानाहे कस्मिन्वेश्य एकविधिकाद्धी तु स्वेपमाकल्यान्वमदर्शा वेश्य इति लिंगाच्च वैश्य

शा० ६ सोमवेदस्याधिकारः॥ ॥इतिश्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्याने प्रकाशाख्याने षष्ठाध्या
३१ यस्य षष्ठः पादः॥६॥ ॥स्वदा॥ पूर्वपादेषु एकवदपर्यालोचनाद्विशेषतः प्रसक्तस्याधिकारस्य धनं
नरवाक्यानलादिबलान्नव्यवस्थोक्ता इह तु यत्तदपर्यालोचनाद्विशेषतः प्रसक्तिस्तसद्भावादेव
विशेषव्यवस्थोच्यत इति पादांतरत्वं। अस्याश्च सूक्ष्मत्वादानंतर्यं सर्वेषामिति। धनस्याप्यस्वीयस्य
दानासंभवेन स्वशब्दस्य स्वीयवाचित्वाभ्युपगमकत्वादिति भावः। विधेयादित्यादि वदिति भावः। परस्व
त्वापादनमिति। ननु स्वस्वत्वागोपि येनपि त्रादेर्न स्यादन्यथा कन्यादानादौ स्वत्वत्यागायोगेन
दानत्वानापत्तेरिति भावः॥ परस्वत्वापादनमिति। स्वत्वत्यागपूर्वकमेवेतद्दानमन्यत्रेत ग्रावहारा
भावात्कन्यादानादौ तु गौणो व्यवहार इत्यर्थः॥ भिन्नयेति। न स्वेकेनात्मीयत्वाकारेणोव ज्ञातेषु
नादिषु स्वशब्दहानिः संभवति। अनात्मीयेपि धने ज्ञातौ च प्रयोगादतो धनादिषु आत्मीये च भिन्ने श्री।एम:
व शक्तिरित्यर्थः। तत्रैकस्मिन्निति। धनमात्रस्य दानासंभवादात्मीयत्वमर्थसिद्धं ननु तावता वाक्ये ३१
आत्मीयता परः स्वशब्द इति भावः। नस्मादिति। तथा च धनेनैव विश्वजित्यधिकारः न ज्ञात्याहिते

तिभावः॥ नम्र॥ वास्तक्षेत्रादिव्यावर्तयति महापृथिवीति पित्रादीनां दाना संभवे त्विमां मेदीनं स्या
दिति संगतिः॥ एका॥ इह स्वत्वादस्य दानमिति संगतिः केसरि गोष्ठ्यादीन् विहितेति सर्वस्वंद
दातेति विधिना विहितेत्यर्थः। दशमाष्टमपणहाघन्याये पर्युदासत्वेन केसरि व्यतिरिक्तं सर्वस्वंद
दातेति तच्छासशेषत्वान्नियतमेव दानमिति सिद्धान्तमेहपर्युदासइति। सत्रे अन्याद्दिदानस्या
कर्तव्यत्वात्तदइति रथनास्तनस्त्राहीनां विशेषः स्यात्। नित्या॥ पूर्वं चाहिनास्तिपर्युदास इ
ति संगतिः कुर्यस्वर्गे रजतमभिन्नधने। यत्सर्वस्वमिति सर्वविधस्वकर्मकदानस्यैव कृत्नप्रका
रकत्वाद्दविद्यमानमपि संपाद्येयमित्यर्थः स्वशब्दस्वात्मीयवाचित्वादसतस्थानात्मीयत्वा
न्नास्ति दानमित्याह किं चेति। सत्रे दानस्यानित्यत्वादर्जनीपानां कदाचिदलाभेनानित्यत्वान्न
ते दानस्यास्ति संबंधः। प्राड्। धर्मशासनार्थमुपनतस्य प्राडिस्यात हानीविधेयत यास्वत्वसद्भा
वादस्य दानमिति संगतिः। दासास्विति। तस्यपरतंत्रतया नि ज्ञानयुक्तेतिभावः। सत्रे देयश्च
नदेयः तस्य धर्मशास्त्रत्वात्। धर्मशासनार्थमुपनतत्वात्॥ दक्षिणा। प्रागिति। कृतकर्तव्यताध्यव

शा॰६ ३२ सायानंतरमिति यावत्। सर्वस्वदिहनसर्वेशह्रसंकोच इति संगतिः। अशे।। त्रिविधस्यापि स्वत्वे
३२ न भाविविवेचन्यात्तंगतिः। अंत्यंताश्च श्नदानके भागान्तरेपि सर्ग्रवेनां विधो विधिबलादेवत
३२ त्वदानप्रसक्त्याविधेर्गौरवं स्यादितिय न्नार्थे निर्दिष्टभागमात्रगोचरत्वं तत्स्येति सिद्धांतमाह द
क्षिणार्थेनेति। सत्रेकर्मणोऽव्याधीनसिद्धिकत्वात् शेषाभावाद्दक्षिणादानांतं स्यात्। अहो। ए
कोहे विश्वजिति सर्वस्वदाने नाधिकारे प्यहीनांतर्गतेन तथेति संगतिः। अभिप्लवइति ज्योतिर्गो
रायु रायुर्ज्योतिर्गौरिति षडहानीत्यर्थः। स्यापविष्यतइति। अष्टमइति शेषः। अतिरिक्तप्रतइतीह द्व
ादशाहदक्षिणापरलक्षणपरं अन्वहं द्वादशशतानेव दानीत्यादीनां बहूनां दक्षिणाकल्पानां द्वा
दशाहे आम्नानेन ज्योतिष्टोमाद तिदेशासंभवादिति। आमिमात्रपरमिति विश्वजिति सर्वस्वदा
मिरत्तीसेतन्मात्रपरं ननु विश्वजिति सर्वस्वं देयमित्येवं परमित्यर्थः। ननु प्राप्ताप्राप्तविवेकेन द्व्यहे यन्त श्रीराम:
त्राह प्राप्तमिति। साधर्म्यापधर्मेवत्वा येत्यर्थः। विश्वजिति सर्वदाने इतरे षांधर्मलोपः स्यादितिभा ३२
वः। किंच विश्वजितस्तादितरेषां चाह्नां दक्षिणाभेदोपि न संभवतीत्याह एकेवचेति। सत्रे अहर्गणे

सर्व२ विद्यमानेपि विश्वजित्सर्वपृष्ठे स्वधर्मयुक्तः सर्वेषां विश्वजितामविशेषात्॥ विका॥ यथा सर्ववि
श्वजितामविशेष एवं स्वदाने सर्वेपुरुषाणामिति संगतिः। तत्रन्यूनइति। वचनस्य बहुविषयत्वा
यापूर्वविधिरस्त्विस्त्याशयः। नियमविधिसंभवेत्र पूर्वविध्ययोगात्न्यायागतेस्वल्पविषयत्वमपि
नदोषइति सिद्धांतमाह। इहत्विति। सत्रेसर्वस्वधर्मः प्रकृतविकारः सन्नुभयतः न्यूनेअधिकेच स्या
दविशेषात्॥ अप॥ यथासर्वस्वंददातीति नापूर्वविधिः। एवमिहसंख्यांतरविधिरिति संगतिः।
प्रतिषेधइति। ततश्चैकादिपरिमाणस्य विहितप्रतिषिद्धत्वाद्विकल्पइतिभावः। सूत्रेत्वपरिमा
णेश्रूयमाणेविशिष्टस्यैकादेर्या संख्या एकत्वादिका तस्याप्रतिषेधः स्यात्॥ अनि॥ पूर्वोक्तेविशे
षविचारोन्संगतिः॥ पर॥ पचतभोजनार्थमितिशेषः। विधिरिति। अपवसथ्येहनि स्वारण्यभोज
नादिना विकल्पितस्य माषभोजनस्य विधिरित्यर्थः। नन्वौडुंबराधिकरणेन पौनरुक्त्यं तत्राह
स्यितमित्यादिना नात्रविधिसरूपाणामर्थवादत्वं व्युत्पाद्यते येन पौनरुक्त्यं स्यात् किंतु विधिपदे
चिंतांतरं क्रियतइत्यर्थः। वासिकेष्टकैकत्वेनेति। तत्रैकेष्टकत्वसंख्यास्त्वरूप्यमाणो विधिस्तन्मो

शा॰ ६ त्र विषयो भवतीति भावः। ततश्चापरिमितशाखवदिहापि नाविशेष इति संगतिः वार्षिकर्त्तैकत्वेस्ता
३३ वकं न स्तक संभवितुमर्हतीति नाशिष्टाचरितत्वेन मापपाकमात्रमेव स्तोतव्यमिति तत्क
ल्प्यविधेः सर्वविषयत्वमिप्यादि मैवमिति। अर्थवादो वेति। अर्थवादो वा विधिशेषत्वादिति सूत्रे
ण। एयाशान विधिशेषत्वादर्थवादः जर्तिलयवाग्वा जुहुयादिति कृत्वाचिंता कूटनमित्यर्थः। म
त्रे इति ह स्माह बकुरित्याद्येककर्तृकमुपाख्यानं परकृतिः उल्मुकेः स्मपूर्वे समाजग्मुस्ता
न सुरारक्षांसि निजघ्नुरित्यादि बहुकर्तृकोपाख्यानं पुराकल्पः। तदिदं द्वयमपि मनुष्यधर्मत्वे
न विधेयं स्यात्तथा सति तदनुकीर्तनं प्रयोजनाय भवति। यद्यपि पुराकल्पोदाहरणे कृत्वाचिंतेनास्ति
तथापि गृहपतेरेवाग्निषु निर्मथ्या निर्वपेरन्निति विध्यंतरशेषत्वादनि संसर्गि स्तत्रार्थमुल्मुक सं
सर्गो निंदेति न निंदाकल्प्याः निषेधबलेन पूर्वपुरुषाचरितत्वेन वा विधिः कल्प्यतो यदुक्तं विधित्वा
र्थवादत्वश्चाकारमात्रसारूप्येण सूत्रभाष्ययोः सहोदाहरणं॥मह॥ पूर्वैत्र हस्तिगात्राणामेव ति श्रीमः
नियमाभावे षीहृगंधर्वाद्युधिकारनियमोस्त्विति संगतिः एतावद्दिना रसायनादेरारोग्यमा ३३

त्रै हेतुत्वादिति भावः। कुलकस्येति येनाखंडतत्सत्रादिभिः समापनीयमित्यर्थः। अहंभवादि
ति मानाभावात्तत्र विधेरन्यथानुपपत्तेरिति भावः। यजमानेति। पंचपंचाशनइत्यनेन पंचगु
णितपंचाशत्संख्यया सार्धशतद्वयसंख्याका यजमाना भवंतीति त्रिवृत्स्तोमकं सोमयागं
एकं संवत्सरं पंचदशस्तोमकमेकं सप्तदशस्तोमकमेकं एकविंशतिस्तोमकमेकं संवत्सरमु
पेयुरिति वाक्यार्थो विवक्षितस्तथा च एकैकः संवत्सरः पंचपंचाशत्संख्ययजमानैः संबंधा
त्स्वयमपि तावत्संख्य इति चतुर्णामपि वत्सराणामेवं पंचपंचाशत्संख्यत्वे सहस्रसंवत्स
रस्योपपद्यते एकस्यैव त्रिवृत्संवत्सरस्य तावद्भिः संबंधेन तत्संबंधस्य बहुत्वानुवादः त्रिवृ
त्संवत्सरा इति बहुवचनमिति भावः। अर्धतृतीये इति। तृतीयमर्धमेवत्वनुवर्णमित्यर्थो धि
कं द्विशतसंख्याकैरित्यर्थः। अप्युक्त इति। त्रिवृत्संवत्सरशब्दः समानाधिकरणस्य पंचपंचा
शद्वृत्तस्य यजमानसंख्याकत्वायोगादिति भावः। बुद्ध्वेति। यजमानस्याज्ञानुपात्तत्वात्त
द्गतत्वेन संख्या बुद्धिने संभवतीत्यर्थः। नहीति। उपनयाध्ययनदारपरिग्रहपुत्रजननोत्तर

शा० ६ कालत्वाराधानस्येतिभावः। आधानाहर्ष्वमिति। सोमाहर्ष्वमित्यर्थः। इष्टश्च यमयज्ञानामेवसत्रा
३४ धिकारात्। ननु त्रिवृदादिशब्दानां स्तोत्रीयासंख्यावाचिनां द्वादशरात्रेषु विवृद्धिविषये ऽपि लक्षणा
तोल्यात् कथं सामंजस्यमनेनाह त्रिवृदादीति। त्रिवृदादिश्रुतेर्दिवसे लक्षणातः संघेनुले ऽपि
34 न लक्षणेति विशेष इत्यर्थः। सत्रे महत्सु संवत्सरसत्रेष्वनुष्ठेयेषु एभवात्मह स्तोमयुषगंधर्वा
हीनाः॥ ॥इतिश्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्यायां प्रकाशाख्यायां षष्ठाध्या
यस्य सप्तमः पादः॥ ॥इष्टिः॥ ॥चतुर्होतृहोमाहिताग्नेर्नास्त्यधिकार इत्येवमधिकारा
पवाद्वैत्रस्याधान्येनोच्यत इति पादांतरत्वमानंतर्यं चाग्रहान्नाहीत्वासमहोतारं जुहोतीत्या
दीनां कर्तव्यानां क्रत्वधिकार्याहिताग्न्यधिकारिकत्वान्नानुव्यावर्तयति। पुरुषार्थत्वेऽपि इति।
उभयाधिकारा इत्यनंतरमुभयोरग्न्योः कार्या इति शेषः। नार्थप्राप्तमिति। श्रुतेः प्राबल्यात् क्रतौ श्रीरामः
विनियोगे न होमेनैराकांक्ष्यादिति भावः। सूत्रे दर्विहोमत्वादपूर्वोऽप्यक्रतुशेषश्चतुर्होतृहोमः ३४
संस्कृतेष्वग्निषु स्यात्। न चापूर्वे त्वकृतस्थित्यकृतेनाहवनीयाद्यप्राप्तेः कथं संस्कृतेष्विति वा

त्वं। आधानस्य सर्वहोमोपकारकत्वात्सर्वेषामेव होमानां पवमानेष्टिपूर्वत्वाद्याहवनीयेजु
होतौत्यनारभ्यविधिना सर्वहोमसाधारण्येनाहवनीयप्राप्तेः॥ ७४॥ माणवकार्थाइति। आचा
र्यकर्तृकहोमानामप्युपनयनांगत्वान्माणवकार्थत्वमेव। आचार्यस्त्वेकर्त्विकस्थानीय इति
भावः। नार्थे इति। तत्र च आधानस्यानष्टवक्तृद्वारक्रियाप्रयोजकत्वमितिभावः। नन्वप्युत्सकर्मार्थ
द्वारपरिग्रह एव माणुपनयनादस्त्वत आह किंचयइति। स्यादिहाधाने संभवतोमिपूर्ववैषम्या
त्संगतिः। असत्यपीत्तिविहिताधानस्य त्रैवर्णिककर्तृत्वादितिभावः। प्रयोजयेदिति। नचावि
हितस्याधानस्याहवनीयादिजनकत्वात्प्रयोजकत्वं नक्तंगार्हपत्यमादधातीति हि गाहवनीयमि
त्यादि व्यवहारानुसारेण सामान्यतः आधानमात्रजन्यस्याहवनीयादित्वावगमो द्वविहित
स्यापितत्वंसंभवादितिभावः। आधानसामान्यजन्यस्याहवनीयादित्वे आधानविधायकत्वसं
नादिवाक्यवैयर्थ्यापत्तिरित्याह यत्र ह्याधानस्येत्यादिना। तत्रेष्टयपतौष्टिर्यागप्रयोजकत्वमेव
मन्याधेयमपि प्रयोजयेदेवं सत्यग्नित्वादिनैरेवस्याधिकारः किंन स्यात्तत्राह तादर्थ्याचाप्रव

शा० ६ न्येतनेनाधानसंस्काराऽपवर्गादिहृष्टिमत्त्वाभावान्नकर्मानिरेषधिकारः। अ०४॥ अथ किरेत्त्वाग
३५ मनाऽऽस्तत्वतः स्यात्। अतिदेशस्य विशेषाशंकानियाकरणार्थत्वान्मा हव्रस्त चागिरणाऽइति।
३ रा॥ ब्रह्मचार्येव समगाऽउपनयनादिकालनिरूपणमिहि संगतिः स्मतेरिति अपवर्षे मिति।
सामान्यश्रुतेर्विशेषेप्याविरोधाक्षिति भावः। सत्रे उदगयने पूर्वपक्षे हमिपुण्याहे नपुंयंतेज न
स्व्यहरित्युक्ते देवानिकायोगित्कालस्मरणादेतहेदेवानां हूयपडुगपनमवेपक्षा हरित
रथापितृणामिति निरूपदर्शनात्सवी सक्षौवेदेवानां मध्यं हिहि निनामनुष्याणां अपरो हलेः पि
ष्य तृणामिति त्वेन्माथे हर्शनाच्चाऽइत। पिंमप्रिपितृयज्ञादिकं कालविशेषसंयुक्तेनोदाहरणमिति पिंड
बोध्यं॥ पा चा॥ ३ हापि सामान्यश्रुतेर्विशेषेप्यविरोधाद्विशेषविषयत्वमिति संगतिः। नेषा॥ मा
३२ यं शावृं सामर्थ्यादितिपयोर्तषेषवासमांपुरुषसंस्कारार्थत्वादन्येनापितत्संस्कारसिद्धेर्यः। सपु
र्यास्मानिति मंत्रयोश्च किं द्वाराक्रत्वंगत्वमित्यपेक्षायां सामर्थ्यान्मायुकरणादिजनितदोषनि श्रीरामः
घीतिहारोत्पवगमादेतेषां सर्वेषामनित्यत्वमिति विशेषाशंकेत्यर्थः। नित्यवदानाम्नानात्येपाव ३५

शा॰ ३६ नाहिंसं स्वकृतं एव तु रूपः कृतोरंगं नान्यथेमिति कल्पनात्वमंत्रयोरपि नित्यत्वविहितयोरनित्यद्रा
व्यत्वानुपपत्तेः श्रुयनन्तुरुण सामर्थ्यपरित्यागादेहे दूषां सर्वेषां नित्यवदेवांगत्वमिति परिहरति । नि
मित्तेति ॥ अत्र ॥ यत्तूदाहरणमात्रत्वाद्दस्य न स्वपक्षः । सत्रेऽत्र न षष्ठकं ख्याप्रधानलोपो दृष्टः । ह
पशु ॥ सामान्याद्वा सितेति । चोदनामंत्रापेक्षया भिन्ने वा मंत्वान्तस्त्रुत्वसामान्ये पर्यवसितेत्यर्थः । नि
गमादिति । छिद्रेणीमे श्च छाग शाहृदत्याश्रयणो छिन्नगमनयोगात्प्रकाशाविष्यतीति भावः । य
द्वादेति । एवं च सर्वेवदिहापि अनित्यत्वमिति संगतिः । तस्मादिति । तथा च छागेनैव पशुयागे श्र
धिकार इति भावः । अध्यायार्थमुपसंहरन्नुत्तिष्याहितार्थेवृत्तवर्तिष्यमाणावद्धकृत्यार्थशरिगृहत्वा
तिर ति । अधिकारिति ॥ ॥ इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्यायां प्रकाशाख्यायां ष श्रीरामः
ष्ठाध्यायस्याष्टमः पादः ॥ ८ ॥ समाप्तश्च षष्ठाध्यायः ॥ शुभमस्तु ॥ ॥ ॥ ॥ ३६

36

५६

ष ३६

मीमांसा शास्त्र दीपिका

१०..

षष्ठाध्यायाष्टमपादः शास्त्रदीपिका प्रकाशाख्या टीका

षष्ठाध्यायः